आरण्यकम् सितम्बर 2010 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
   41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
   21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
   51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
   51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
   60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
   204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

## सम्पादकीय-विशेषाङ्कः

संस्कृतप्रसारपरिषद्
आरा (विहारः)

सप्तदशं वर्षम्, द्वितीयोऽङ्कः
सितम्बर 2010

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
   (क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
   (ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना **'आरा' ( विहारः )** नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

**संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्**

**वर्षाङ्कौ - सप्तदशं वर्षम्, द्वितीयोऽङ्कः**

**आश्विनः, वि.सं.२०६७**

**सितम्बर, २०१०**

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि

वार्षिकं शुल्कं ५० रूप्यकाणि

परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


## प्रास्ताविकं शुभाशंसनम्

बिहारराज्यस्य सौभाग्यमेव यदस्य आरानगरादारण्यकाख्यं संस्कृतशोधपत्रं षाण्मासिकं तत्रत्यायाः संस्कृतप्रसारपरिषदः संरक्षणेऽष्टादशवर्षेभ्यः सत्यपि बहुविधे व्यवधाने प्रायशः सातत्येन प्रकाशितं जायते। आरानगरपरिसरस्य वैशिष्ट्यं संस्कृतभाषायां कारयित्रीप्रतिभाभिव्यक्तिदृशाऽतिगभीरं वर्तते यत्र विविधाः कवयो गद्यकाराश्च संस्कृतसाहित्यभाण्डागारं पूरयन्तो विभूषितवन्तः तन्मण्डलवसुन्धराम्। केचन दिवङ्गता तथा रामनाथपाठक 'प्रणयी'-भवानीदत्तशर्मा-व्रजभूषणमिश्र 'आक्रान्त'-उपेन्द्रनारायणदत्त-शर्मा-वचनमिश्र-प्रभृतयः। तेषु बहूनां रचनाः सम्प्रत्येव प्रकाशिताः संस्कृतप्रसार-परिषदा। वर्तमानेषु कविषु कापिशायनी-आर्यासहस्राराम-प्रभृतीनां प्रसिद्धानां काव्यानां यशस्वी लेखको जगन्नाथपाठकः। सेयं कारयित्री प्रतिभा भावकानपेक्षते प्रकाशकाँश्च, नान्यथाऽनुपमापि रचना दृष्टिपथं पाठकानां सम्प्रत्यपि याति।

हर्षस्यायं विषयो यदद्य वैज्ञानिके युगे प्रसारस्य नाना साधनानि विकसितानि। पुस्तकप्रकाशनं पत्रिकासु लेखप्रकाशनं सम्मानसमारोहः दूरदर्शनादिषु ग्रन्थकारसाक्षात्कारः काव्यपाठः कविसम्मेलनं सम्मानसमारोहः इत्यादयोऽहर्निशं सुलभाः। क्षिप्रगत्या विकासशालिनि सञ्चारसाधनजाते पत्रिकाणां महत्त्वं सम्प्रत्युपेक्षितमिव दृश्यते किन्तु परमार्थतस्तथा नास्ति। अद्यत्वे पत्रिकाणां संख्यावृद्धिस्तां धारणां रुणद्धि। प्रकाश्यन्ते बहुविधानि पत्राणि पठ्यन्ते, क्रीयन्ते, विक्रीयन्ते च। शिक्षिता जना न पत्रपाठं विना दिवसमपि स्थातुं समर्थाः।

पत्रेषु च किञ्चित्तात्कालिकीं सूचनां प्रदाय विरतव्यापारं जायते। किञ्चित्स्थायिनो महत्त्वस्य लेखादिकं सम्पादकीयं च प्रकाशयति, किञ्चित्त्रापि साहित्यिकं किञ्चिच्च शोधपत्रप्रधानमिति नाविदितं विदुषम्। शोधपत्रप्रधानानि पत्राणि विरलानि सन्ति, संस्कृतभाषायां तु प्रकाश्यमानानि सुतरां विरलतामुपयान्ति। आरण्यकं तेष्वेव विरलतरेषु संस्कृतशोधपत्रेषु नूनमेषु वर्षेषु प्राधान्यं लभते। आरानगराद् यद्यपि मागधं नाम बृहत्परिमाणं शोधपत्रं डॉ. नेमिचन्द्रजैनस्य सम्पादकत्वे पूर्वं प्रकाशितमासीत्, यस्य केचन विशेषाङ्काः स्थायिनो महत्त्वस्यासन् किन्तु पञ्चषाणामङ्कानामनन्तरमेव अर्थसमर्थनाभावे संवृतमेव तत्प्रकाशनम्।

आरण्यकं त्वद्याष्टादशवर्षीयमास्ते इत्यहो प्रमोदावहो विषयः। अस्य प्रकाशने सम्पादकवर्यस्य डॉ.गोपबन्धुमिश्रस्यासामान्यः परिश्रमोऽध्यवसायश्च नापह्नुतावस्माकं

प्रो. गोपबन्धु मिश्रः
सम्पादकः

दृशः। लेखकानामभ्यर्थनं, सम्पादनं लेखानां, मुद्रणालयस्य भूयो भूयो बाधानिरसनं, मुद्रणसंशोधनमित्यनेकैः सोपानैः शारीरिकं बौद्धिकं च श्रमं वितन्वानोऽसौ सम्पादकीय-लेखनेऽपि स्वकीयां भावयित्रीं प्रतिभां सम्यगदर्शयत्। प्रायेण शोधपत्रसम्पादकीयेषु तदङ्कगतशोधपत्राणां विषयालोचनमेव दरीदृश्यते किन्त्वारण्यकसम्पादको न काञ्चन नियतां सरणीमनुसृत्य प्रवर्तत इति विशेषः। क्वचित्सामयिकं स्थायित्वमूलकं शाश्वतं वा विषयवस्तु समालोचितं यथा संस्कृतभाषाया अनिवार्यता विषये सम्पादकीये व्याकरणशास्त्रपरिभाषाया उपक्रमो दृश्यते–'गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः' इत्यत्र शाश्वतिकता, बिहारप्रान्तीया शिक्षाव्यवस्था तु सामयिकी, उभयोरपि तारतम्यं समायोजितं सम्पादकप्रवरेण।

अस्ति महान् सन्दर्भविशेषः सम्पादकीयटिप्पणीषु शाश्वतिकः प्रत्यङ्कमारण्यकस्य। वर्षदशकस्य सम्पादकीया निबन्धा महाभाष्यविषयवदाकरग्रन्थश्रेणीमवाप्तुमर्हन्ति, संस्कृतजगति सम्पादकस्य बहुविषयाभिनिवेशिनः अनुभववैशद्यं द्योतयन्ति। लोकशास्त्रकाव्याद्यवेक्षणाद्या नैपुणी प्रतिभाजुषां कवीनां काव्येषु स्फुटीभवति, सैवारण्यक-सम्पादकस्यापि प्रकृतेषु सम्पादकीयेषु निबन्धेषु सरलसरलया गिरा सर्वसुगमया विशदीभूतेति विश्वसिमि।

इह निबन्धेषु क्वचिच्चित्रात्मिकी कवितारीतिः गद्ये स्फुरति। यथा सितम्बर २००० अङ्के सम्पादको भावुकतामवाप्य लिखति–"तत्र मानवता विलपति, सौमनस्यं हिमपातेन कुमुदमिव शीर्यते, स्वार्थान्धता राजते, प्रेम पराभूयते, अनुरागः विषयरागम् अनुधावति, सूर्यरश्मिः कृशकायेन मेघेनेव सत्त्वं तमसा आच्छिद्यते, पतितम् उत्थितायते, प्रमादः प्रमुद्यते–इत्येवमेव सर्वमनिष्टकरं भवति।" प्रायेण सर्वेऽपि निबन्धाः दर्शन-चिन्तनोपक्रमाः क्रमेण सामयिकं विषयप्रपञ्चं स्फोरयन्ति, यतः शिक्षणपाटवं सम्पादकस्य स्फुटीभवति। रोचकता तार्किकता च प्रतिवाक्यं विलोक्यते। एतादृशानां दशसु वर्षेषु रचितानामारण्यकसम्पादकीयानां निबन्धानां सङ्कलनप्रबन्धनमपि सुरभारतीरसिकानां हितं यन्यमानेन डॉ.सुनीलकुमार प्रधानेन क्रियते इति साधुवादार्होऽसौ। मूलसम्पादकीय-रचयितुः डॉ.गोपबन्धुमिश्रस्य यशोराशिसंवर्धने निबन्धाः नूनमेव भूतपूर्वाः सन्तोऽप्यभूतपूर्वाः प्रत्यग्राश्च सम्प्रत्यपि चकासतीति मन्यते प्रकृतपङ्क्तिलेखकः।

अक्षय तृतीया, २०६८ (वि.) **उमाशङ्करशर्मा 'ऋषिः'**

(पूर्व) संस्कृतविभागाध्यक्षः, पटना विश्वविद्यालयः



## सम्पादकीयम्

सम्पादकीयानां सम्पादकीयम्। कियद् विस्मयावहम्? किमिदं सम्पादकीयम्? सम्पादयतीनि सम्पादकः। सम् उपसर्गः। पद् गतौ धातुः, प्रेरणार्थे णिच्, ततः ण्वुल् प्रत्ययः, वोरक्, कर्तरि एष प्रत्ययः। सम्पादयति इत्यस्य सम्यग् गमयति प्रापयति वेति अर्थ कर्तुं शक्यते। सम्पादनं द्विधा विभाजयितुं शक्यते–अखण्डं सखण्डं च। अखिलस्य ब्रह्माण्डस्य तद्गतानां चराचराणां दृश्यादृश्यानां सकलानां सर्वविधोद्भूति-वृत्तिलयविषयकं यत् सम्पादनं नैरन्तर्येण निरवधि प्रचलदस्ति तद् अखण्डम्, किं च 'ये द्वे कालं विधत्तः' (अभि.शा.1/1) तौ सूर्यचन्द्रौ यद् दिवसरात्री वर्षमासदण्डादि निर्धारयतः तत् सखण्डम् इति कथयितुं शक्यते।

किं च, समकालमेव उभयविधसम्पादनवृत्तिः प्रवर्तते एव। तत्र अखण्डं सम्पादनं व्यापकं सखण्डं च व्याप्यम् इति तयोः व्याप्यव्यापकभावोऽपि समीक्षितुं शक्यते। तर्हि एतद् दृष्ट्या यौ सखण्डवृत्तिसम्पादकौ, अखण्डवृत्तिसम्पादकः तयोः प्रयोजकत्वेन सम्पादकीयानां सम्पादकः इति ऊहितुं शक्यते। तर्हि जगति किञ्चिदपि कार्यं तदितरनिरपेक्षं भवितुं नार्हति। अपितु ज्ञातया रीत्या अज्ञातया वा सर्वं तत् केनचिद् अपरेण प्रेरितं नियन्त्रितं वा भवति। तत्रापि यः सः 'अपरः' इति कथ्यते सः वस्तुतः किम् अपर अर्थात् पूर्णतः भिन्नः भवति? चिन्तयतु, सूर्यरश्मिः समुद्रात् जलमाकर्षति इति तद्रश्मेः जलाकर्षणवृत्तिः किं सूर्यं विना भवितुम् अर्हति, किं च सूर्यः यत् स्वकिरणैः तदाकर्षणवृत्तिं साधयति सः किम् एतत् कर्तुम् अकर्तुं वा स्वतन्त्रः अथवा तेनेदं करणीयमेव? न केवलम् एकस्मिन् ऋतौ एकस्मात् सागराद् वा अपितु तेन तत् सर्वथा निरपेक्षतया निरन्तरं च सम्पादनीयमेव। अतोऽत्र यदि किरणाः चिन्तयेयुः यत् त एव जलाकर्षणस्य सम्पादकाः, किं च यदि सूर्योऽवगच्छेत् स एव जलाकर्षणविधौ कर्ता किरणाश्च केवलं करणानीति, तर्हि एतच्चिन्तनं पाक्षिकं भवेतु खलु?

स एव कर्ता, यः सम्बद्धव्यापारसम्पादने स्वातन्त्र्येण प्रवर्तेत, "स्वतन्त्रः कर्ता" (पा.1.4.54) इति सूत्रात्। यदि सूर्योऽपि तद्व्यापारं कर्तुमकर्तुं वा स्वतन्त्रः नास्ति तर्हि तस्यापि तद्व्यापारे कर्तृत्वं नास्त्येव। तदेवं प्रत्येकं वृत्त्याः एवमेव। तदितरवृत्तिसाकाङ्क्ताम् अभिलक्ष्य उपर्युक्तसूत्रवृत्तौ 'क्रियायाम् स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्' (सिद्धान्तकौमुदी) इत्युक्त्वा स्वातन्त्र्यस्य विवक्षाधीनत्वं परामृश्यते। तेन विवक्षावशात् यथा सूर्यस्य जलाकर्षणवृत्तौ सम्पादकत्वम्, सूर्यरश्मीनामपि तथैव

तद्धेतौ सम्पादकत्वं सिध्यति। तत्रापि वयं व्याप्यव्यापकभावमादाय उभयोः स्तरभेदमाकलयामः। तत्र वयं सूर्यरश्मीनां सूर्यस्य च मिथः अभिन्नतां पश्यामः। अतः यद् वयम् एकस्य सम्पादनम् 'अपरः' नियमयतीति वदामः, तदपि लौकिकभेदबुद्धि-मादायैव। वस्तुतोऽत्र नियामको नियताद् अभिन्न एव। गीतायां यथोक्तमस्ति–

**उद्धरेदात्मनाऽऽत्मानं नात्मानमवसादयेत्।**

**आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।।** (गीता 6.5) इति।

अर्थादत्र उद्धारकोऽप्यात्मा, उद्धार्योऽपि आत्मैव। प्रेरक आत्मा, प्रेरितोऽप्यात्मैव। यत्किमपि उद्धार्योद्धारकभावः प्रेर्यप्रेरकभावो वा सम्बन्धः परिकल्प्यते तत्तु तदंशविशेषस्य वैशिष्ट्यमादायैव।

इदानीं पश्यामः आरण्यकस्यास्य उद्भवे सम्पादकत्वं कस्य कदा वाऽऽसीदिति। 1987 ईस्वीये वर्षे आरानगरस्य प्रकाशपुर्यां पण्डितव्रजभूषणमिश्र 'आक्रान्त' महोदयानाम् आवासे अर्थात् तत्कालीन 'संस्कृतप्रसारपरिषत्'कार्यालये एकं विशिष्टम् उपवेशनम् आसीत्। तत्र आरानगरस्य सर्वेऽपि विद्वांसः समुपस्थिता आसन्, तद्यथा–आचार्यकमलाकान्त उपाध्यायः, पण्डितसभानाथ पाठकः, पण्डितरङ्गनाथ पाठकः, पण्डितरामेश्वरनाथ पाठकः, पण्डितचन्द्रशेखर पाठकः, कविप्रवरौ डॉ.रामनाथ पाठकः 'प्रणयी' तथा च आचार्यः अम्बिकादत्त त्रिपाठी 'व्यासः'। स्वयं संस्कृत-प्रसारपरिषदः अध्यक्षः पण्डितव्रजभूषण मिश्र 'आक्रान्तः' समुपस्थितोऽप्यासीत्। संयोजकत्वेन डॉ.राजकिशोरमिश्रस्य उपस्थितौ एष सम्पादकीयलेखकः कामपि सहयोगितां विदधाति स्म। एतादृश्यां सुधर्मातुल्यायां विद्वत्परिषदि आरानगरस्य पक्षतः कापि संस्कृतपत्रिका प्रकाशनीयेति सर्वसम्मत्या निर्णयो जातः। तस्याः नाम आरानगरस्य प्राचीनं नाम "आरण्य" इति (अनेकेषां विदुषामेतदेव मतमस्ति) तथा च तत्र विद्यमानायाः प्रसिद्धायाः "आरण्यदेव्याः" अन्वर्थतामाश्रित्य "आरण्यकम्" इति भवेत्, सा च पत्रिका षाण्मासिकी भवेत् इति सहजाभिव्यक्तिः सर्वैः समस्वरेण समुद्घोषितम्। संस्कृतजगति 'संस्कृते'ति शब्दसाहचर्यं विनापि एकामद्वितीयां वैदिकसंस्कृतिं, स्वनगरस्य ऐतिह्यं देवस्थानं च सुतरां ज्ञापयदेतन्नाम सर्वेषां तत्र विद्यमानानां शास्त्रशास्त्रान्तरेषु कृतभूरिपरिश्रमाणां निश्चलनिर्मलान्तःकरणानां विदुषां मानससंकल्पस्य मूर्तरूपमिव आविरभूत्। अतोऽस्याः पत्रिकायाः मूलं सम्पादनं तु तैरेव विहितम्, केवलम् उपचारेण कश्चिदस्य सम्पादको भवति। इदानीमेते विद्वांसः क्रमशः कालस्य करालरीत्या शिवसायुज्यं प्राप्तवन्तः सन्ति। किन्तु तेषामेषा संकल्पसम्भूता 'आरण्यकम्' इत्याख्या संस्कृतशोधपत्रिका तन्मानसहंसीव



संस्कृतवाङ्मयसमीक्षाजलह्रदे "चरैवेती"ति धर्ममाश्रित्य विहरति। स्वनामधन्यानां परमविदुषां महामहिमराष्ट्रपतिपुरस्कारेण सभाजितानां स्थापनाकालत एव आरण्यकस्यास्य परमसम्माननीयपरामर्शदातृपादानां प्रो.उमाशंकरशर्मा 'ऋषि' महोदयानां परामर्शेन केवलं संस्कृतशोधरूपेण स्वात्मानं पुरस्कुर्वती, वैधानिकप्रक्रियाविलम्बकारणतः 1987तमे वर्षे लब्धजनिरपि 1994तमे वर्षे एव (प्रथमप्रकाशनमिति) पञ्जीकृता, क्रमशः विकासमार्गमारुह्य प्राचीनमुद्रणं विहाय नूतन 'आफ्सेट्' मुद्रणेनात्मानं प्रकाशयन्ती, राष्ट्रियसंस्कृतसंस्थानपक्षतः नियमितरूपेण प्रतिवर्षं सहायताराशिं लभमाना, यथाकालं ISSNसंख्ययाप्यन्विता सेयम् 'आरण्यकम्'।

यथालिखितं तथा आरानगरस्य सर्वेषां विदुषामेव सहसम्पादनेन सम्पादितायाम् अस्यां यथानियमं प्रत्यङ्कम् औपचारिकेण सम्पादकेन 'सम्पादकीयम्' इति शीर्षकम् आदाय यद्यत् लिखितं तत्तत् सर्वं तत्तकालगतधर्मम् अनुपेक्ष्यैव निःसृतम्। शोधपत्रिकासम्पादनमिति सुतरां विचिन्त्य संस्कृतसमीक्षाजगति तथा च संस्कृता-ध्ययनक्षेत्रेऽपेक्षिता विषया यथा अस्माकम् अन्तः प्रविशेयुः एवं च संस्कृतमुखेन बहिरागच्छेयुरिति भूयो भूयः प्रार्थनापुरःसुरं विदुषां पुरतः आरण्यकं न्यवेदयदेव।

विविधेषु कालखण्डेषु 'संस्कृतसौरभसञ्चयनम्' इति परिकल्पनामाश्रित्य हिन्दीपद्यानुवादसहितं मेघदूतम्, उपेन्द्रविज्ञानदर्शनम्, भरतचरितम् इव महत्त्वपूर्णग्रन्थानां प्रथमवारं प्रकाशनम् एतस्यां पत्रिकायां परिशिष्टरूपेण विहितम् इत्यस्या अपरेयम् उपलब्धिः।

श्रेयांसि बहुविघ्नानीऽति सुप्रथितस्य वचसोऽपि 'आरण्यकम्' नापवादोऽस्ति। उत्तमा लेखाः, प्रकाशनम्, मुद्रणम् (तदानीम् आरा, बिहारे विद्युतो महत्यनियमितता अपि एकं कारणम्), धनम्, अनुदानम्, ग्राहकसंग्रहः, ग्राहकसंरक्षणम्, संस्कृतपत्रिकाभिः सह पत्रिकाविनियमः इत्यादिभिः विविधैः प्रसङ्गैः बहुवारम् अनियतकालगत-प्रकाशनव्यथामनुभवन्ती एषा सहानुभूतिप्रवणैः विद्वद्भिः अङ्गीकृता।

इदानीम् एतस्मिन् अतीते काले यद्यत्प्रसङ्गं पुरस्कृत्य सम्पादकस्यास्य निवेदनं सर्वेषां पुरतः समागच्छत् तेषां संकलपूर्वकसम्पादनेनानेन आत्मनः इतिहासपुनराव-लोकनमिवानन्दोऽनुभूयमानोऽस्ति। एषोऽनुभवो विदुषां प्रसादादेवेति भूयोः भूयः तेषां चरणेषु प्रणतीः विनिवेदयति।

गोपबन्धु मिश्र

सम्पादकः

# सूचीपत्रम्


| विषयः | पृष्ठम् |
|---|---|
| १. मार्च - २००० (माध्यमिकपरीक्षायां संस्कृताध्ययनम् अनिवार्यम्) | १ |
| २. सितम्बर - २००० (शास्त्रशस्त्रयोः यथाविभागम् उपयोगः) | ३ |
| ३. मार्च - २००१ (राष्ट्रियशिक्षायां संस्कृतविद्यायाः आवश्यकता) | ५ |
| ४. सितम्बर - २००१ (मानवोत्तरगुणानां विकासाय प्रयत्नः) | ७ |
| ५. मार्च - २००२ (हे आक्रान्त! विशुद्धात्मन् !) | ९ |
| ६. सितम्बर - २००२ (संस्कृतविषये परोपदेशपाण्डित्यस्य निरसनम् एवञ्च, आधुनिकभारतीय भाषारूपेण संस्कृतस्य स्थानपुष्टिः) | ११ |
| ७. मार्च - २००३ (लक्ष्यसाधनाय परमसाधनायाः अपेक्षा) | १४ |
| ८. सितम्बर - २००४ (प्रतिष्ठाप्रणयः ज्येयान्) | १६ |
| ९. मार्च - २००६ (विद्यावंशो मूर्ध्नि वर्तते) | १८ |
| १०. सितम्बर-२००६ मार्च २००७ (संयुक्ताङ्कः) (नात्यश्नतस्तु योगोऽस्ति) | २२ |
| ११. सितम्बर-२००७ मार्च - २००८ (संयुक्ताङ्कः) (समबुद्धिर्विशिष्यते) | २२ |
| १२. सितम्बर - २००८ (शास्त्रचिन्तनपरम्परायाः प्रवाहनित्यता) | २६ |
| १३. मार्च - २००९ (सात्त्विकबुद्ध्या श्रेष्ठत्वसम्पादनम्) | ३० |
| १४. सितम्बर - २००९ (नियमप्रणयापेक्षया प्रयोगप्रणयः श्रेयान्) | ३४ |
| १५. मार्च - २०१० (अवस्थाभेदानां सापेक्षता) | ३७ |


❖

## मार्च - २०००

'गौणमुख्ययोः मुख्ये कार्यसंप्रत्ययः' इति लोकन्यायसिद्धा परिभाषा व्याकरण-शास्त्रेण अनुमन्यते। सन्तकविः तुलसीदासोऽपि आह–

सेवक कर पद नयन से मुख से साहिबु होइ।
तुलसी प्रीति कि रीति सुनि सुकवि सराहहि सोइ।।

रामचरितमानस, अयोध्याकाण्ड ३०६

अर्थात् – सेवकैः करपदनयनैरिव तथा स्वामिना मुखेनेव भवितव्यम्। एतादृशं स्वामि-सेवकभावं (श्रीरामभरतयोः) कविः नितरां स्तौति।

कदाचित् विशिष्टस्य संकीर्णस्य च स्वार्थस्य कारणेन लोके करपदनयनादीनि गौणानि एव स्वसेवकत्वं परित्यज्य मुख्यं कार्यं कुर्वन्ति, तेन मुखस्य मुख्यता स्वामित्वं वा नश्यति। अनेन व्यतिक्रमेण करपदादीनां स्वकर्मप्रवृत्तिः विहन्यते, मुखस्य च नैसर्गिकी शोभा प्रतिष्ठा वा रसातले गच्छति। एतादृशेन कर्मव्यतिहारेण युक्तो लोकः अभ्युदयरहितः अप्रतिष्ठितः पशुवत् जीवति।

एतादृशी स्थितिः इदानीं विहारप्रान्तस्य वर्तते। विशिष्टतया माध्यमिकशिक्षा-प्रसङ्गे माध्यमिकपरीक्षायां संस्कृतस्य अनिवार्यता समाप्तुकामः विहारसर्वकारः तद्वद् एव मुखस्य मुख्यतां नाशयति। या भाषा भारतीयसंस्कृतेः मूल आधारः, यस्याः गौरवं प्राथम्यम् अवश्यपाठ्यत्वं च सर्वे प्राच्याः पाश्चात्त्याश्च विद्वांसः समस्वरेण वदन्ति, यथा सर्वा हिन्द्यादयः आधुनिकभारतीयभाषाः सम्यक् पुष्यमाणाः सन्ति, तथा च यस्याः भाषायाः अध्ययनम् इदानीं माध्यमिकपरीक्षायाम् अनिवार्यमस्ति, तस्याः इदं प्रामुख्यं नाशयित्वा अपरेषाम् आङ्ग्लभाषासदृशानाम् अभारतीयमूलानाम् अनिवार्यतां साधितुकामा इयम् अपरिणामदर्शिनी बिहारसर्वकारीया व्यवस्था किं सेवकानां स्वामित्वं स्वामिनश्च सेवकत्वं साधयित्वा महान्तमनर्थं नाह्वयति? प्राथमिक-माध्यमिकशिक्षास्तरे आङ्ग्लशिक्षायाः प्राधान्यं संस्कृतसंस्कृतिशिक्षायाः अनुचरत्वं च योजयन्ती मेकालेप्रणीता

आङ्ग्लशिक्षानीतिः, स्वातन्त्र्योत्तरे भारतेऽपि प्रबलतरा जायमानाऽस्ति। स्वतन्त्रतायाः अर्धशतकात् उत्तरेऽपि काले इयं वैचारिकी सांस्कृतिकी च परतन्त्रता अस्माकं राजनीतिकस्वतन्त्रतायाः उपरि शासनं कुर्वतीव विराजते। अन्यथा माननीयसर्वोच्च-न्यायालयपक्षतः भारतस्य संस्कृतेः आत्मपरिचयस्य च रक्षार्थं संस्कृतस्य अध्ययनम् अति आवश्यकम् इति ऐतिहासिके निर्णये आगतेऽपि, माननीयराष्ट्रपतिमहोदयतः आरभ्य प्रखण्डस्तरगतस्य कृतकनेतुः मुखात् 'संस्कृतं देवभाषा, भाषाजननी संस्कृतिमूला भाषा' इत्यादि-बहुषु भाषणेषु निःसृतेष्वपि क्रमशः सर्वेषां प्रान्तानां माध्यमिकशिक्षाव्यवस्थायां संस्कृतस्य अनिवार्यता कथं नष्टतां गच्छन्ती अस्ति?

बिहारस्य माध्यमिकपरीक्षायां संस्कृतभाषाध्ययनम् इदानीम् अनिवार्यमस्ति, सर्वेषां स्वाभिमानरक्षायै भारतीयसंस्कृतेः परिचयार्थं च पूर्वं शिक्षानीतिनिर्धारकैः विचिन्त्यैव संस्कृतभाषाया अनिवार्यशिक्षा साधिता आसीत्। तेन च हिन्दी-मैथिली-भोजपुरी-मगही-वज्जिकादिप्रान्तीयभाषाणामपि सम्यक् पर्याप्तं च पोषणं जायमानमस्ति। परन्तु इदानीं तथाकथितम् अग्रगामिनि (**Forward**) नवीनां शिक्षानीतिं प्रणेतुकामः बिहारसर्वकारः सी.बी.एस.ई. पाठ्यक्रमानुसारितायाः व्याजेन आङ्ग्लभाषाया अनिवार्यतां साधयति, संस्कृतस्य अनिवार्यतां च नाशयति इति महानयं चिन्ताया निन्दायाः च विषयः। आङ्ग्लभाषा अनिवार्या भवतु, तत्र नास्ति अस्माकं विरोधः, परन्तु संस्कृतमपि यथावत् अनिवार्यमस्तु इति स्पष्टोऽस्माकम् आशयः। विहारसर्वकारः शिक्षानीतिनिर्धारण-प्रसङ्गेऽस्मिन् एतस्य अस्माकं सांस्कृतिकस्य नैतिकस्य च जीवनस्य उपरि दूरगामिनं प्रभावम् अवश्यं चिन्तयिष्यति, संस्कृतस्य स्वामित्वं मुख्यत्वं वा अवश्यं रक्षिष्यतीति विश्वसिमः।

'आरण्यकम्' अस्य राष्ट्रस्य मूले संस्कृतवाङ्मये निहितानाम् अनालोचितानां विषयाणामुपरि यत् किंचित् विमर्ष्टुं पूर्ववत् प्रवर्त्तते न वेति विदुषां दृष्टिरेव तत्र प्रमाणम्।



## सितम्बर - २०००

**'अग्रतः सकलं शास्त्रं पृष्ठतः सशरं धनुः'** इति विहारविद्यालयपरीक्षासमितेः प्रतीकात्मकं घोषवाक्यमस्ति। ज्ञानप्राप्तये विवेकसमृद्धये च शास्त्रमावश्यकम्, तच्च जीवने प्राथमिकं भवेत्। पुनः आत्मनः रक्षायै राष्ट्रस्य संरक्षायै च शस्त्राणि शस्त्रसंचालनविद्या अपि अपेक्ष्येते एव। एतत् शस्त्रं सहैव स्यात्, परन्तु एतत् प्राथमिकतया न प्रयोक्तव्यम् इति एतस्य वाक्यस्य तात्पर्यमस्ति। परन्तु आधुनिककाले शास्त्राणाम् अपेक्षया शस्त्राणाम् अधिकः प्राथमिकतरश्च प्रयोगः क्रियमाणः दृश्यते। आदौ एतस्य उपयोगः मनुष्येतराणां प्राणिनां हननप्रसङ्गे व्यसनप्रणयिनां मनुष्याणां द्वारा प्रारब्धः। क्रमशः शस्त्रव्यवहारः आत्मरक्षैकध्येयः न भूत्वा व्यसनपूरकः अभवत्, ततश्च इदानीं बध्याबध्यबोधशून्यः हिंसैकप्राणश्च जायमानो लक्ष्यते। पृष्ठस्य शस्त्रसम्बद्धः विषयोऽयम् अग्रे आगतः। अतः अग्रगण्यः अखिलशास्त्रप्रसङ्गः केवलं शस्त्रप्रयोगकुशलतैकपोषकः इव अनुभूयमानः अस्ति।

अनर्थकमिदं परिवर्त्तनम्। विश्वधर्मः मानवधर्मो वा खण्डनीयः नास्ति। शास्त्रेण 'सह नाववतु, सह नौ भुनक्तु' इति सम्पूर्णे विश्वे सहावस्थानस्य बोधः वर्धते, 'सर्वे भवन्तु सुखिनः', 'आत्मवत् सर्वभूतेषु' इति विश्वकल्याणकारिणी भावना पोष्यते। यत् शास्त्रम् अधिकान्नोत्पादकं, जलस्रोतोज्ञानसंसाधकं, शिक्षासंस्कृतिविकासकरं, कठिनरोगनिवारकं वाऽस्ति, तत् अग्रेसरं भवति चेत् अखिलं जगत् सत्यं शिवं सुन्दरं च भूयात्। परन्तु येन शास्त्रेण अणुविस्फोटकं क्षेपणास्त्रम् एतत्तुल्यमसङ्ख्यं नवनवविनाशव्याप्तिं संसाधयत् शस्त्रम् अस्त्रं च निर्मीयते, येन च शास्त्रेण एतस्य कुशलः प्रयोगः ख्यायते, तादृशं शास्त्रं यत्र अग्रे सरत् दृश्यते, तत्र मानवता विलपति, सौमनस्यं हिमपातेन कुमुदमिव शीर्यते, स्वार्थान्धता राजते, प्रेम पराभूयते, अनुरागः विषयरागम् अनुधावति, सूर्यरश्मिः कृष्णकायेन मेघेन इव सत्त्वं तमसा आच्छिद्यते, पतितम् उत्थितायते, प्रमादः प्रमुद्यते, इत्येवमेव सर्वम् अनिष्टकरं भवति।

एकेन चिन्तकेन उक्तम्-अस्माकं 'गीता' इदानीं विपरीतवृत्तिः जायमानाऽस्ति। मूलगीतायां भगवान् श्रीकृष्णः सारथिः आसीत्, न तु रथी। अर्जुन एव रथी आसीत्। अर्थात् 'आत्मानं रथिनं विद्धि, बुद्धिं तु सारथिं विद्धि' (कठोपनिषद्) इति रीत्या बुद्ध्या सारथिना भवितव्यम् तेन रथी आत्मा सन्मार्गेण स्वलक्ष्यं प्राप्तुं क्षमः भवेत्। परन्तु इदानीम् अस्माकं जीवनगीतायाम् अर्जुनः सारथिः श्रीकृष्णश्च रथी इति वैपरीत्यं सार्वत्रिकमस्ति। आत्मानं 'भोक्ता' इति मन्यमानः अर्जुनतुल्यः द्वन्द्वी अहङ्कारी पुरुषः रथं चालयन् अस्ति, तत्र श्रीकृष्णतुल्या बुद्धिः रथिरूपेण विद्यमाना याथातथ्येन दिग्भ्रमेषु पतिता लक्ष्यविहीना एव दृश्यते। अत एव सम्पूर्णमानवजातिः दानवा इव कुपथगामिनी एवास्तीति प्रतीयते। एतदर्थं शास्त्राणां प्राथम्यं शस्त्राणां गौणता च साधयितव्या एव। अन्यथा सर्वशक्तिमान् विभुः व्यापकः परमेश्वरः भगवान् श्रीकृष्णः महाभारतरणाङ्गने स्वयं रथी न भूत्वा सारथित्वं कथं निर्वहेत्? तत्रेदं तात्पर्य यत् यत्र सारथिः स्थिरमतिः प्राज्ञः तत्र रथिनः जयः निश्चयः। अन्यथा (एतस्य वैपरीत्ये वा) विपर्ययः सुनिश्चित एव। तद्वत् बुद्धिवैभवविकासकारिभिः शास्त्रैः अस्माकं सारथितुल्यैः मार्गदर्शकैः सुतरां भवितव्यं तथा च रथितुल्यैः अस्माभिः सर्वतो रक्षायै रक्षकैः शस्त्रैः सह स्थातव्यमिति भावः।

'आरण्यकम्' इदं शास्त्रशस्त्रयोः यथाविभागम् एवम् उपयोगं विज्ञापयितुं साधनानि योजयत् प्रवर्तते। प्राचीने वा आधुनिके वा वाङ्मये तानि भूयः ऊह्यानि सन्ति। एतदर्थं सर्वैः चिन्तकैः सम्यक् प्रयतितव्यमिति शम्।

☯



## मार्च - २००१

संवादः विवादः विसंवादश्च इति शब्दाः ध्वनिदृष्ट्या केवलं सम्-वि-विसम् इति उपसर्गविशेषाणां सान्निध्यं द्योतयन्ति परन्तु अर्थप्रतीतिप्रसङ्गे एतेषु पार्थक्यं सुतरां दृश्यते। इदानीं राष्ट्रियशिक्षानीतौ संस्कृतभाषायाः ज्योतिर्विज्ञानस्य वैदिकगणितस्य वा स्थितेः विषये एतत् पार्थक्यं सम्यगनुभवितुं शक्यते।

'संस्कृतं' न केवलमेका सामान्या भाषा, अपि तु भारतीसंस्कृतेरियं प्राणस्वरूपा। एतस्याः भाषायाः अध्ययनेन भारते धर्मनिरपेक्षतायाः हानिः कदापि न भवति, अपरं तु एषा एव भारते साम्प्रदायिकसद्भावं सुतरां स्थापयितुं शक्या। एषा धर्मविशेषस्य वर्गविशेषस्य वा भाषा नास्ति, अपि तु राष्ट्रियायाः संहतेः प्रतिष्ठायाश्च कृते अतीव अनिवार्याऽस्ति इति संवादः बहुभिः मनीषिभिः विविधेषु अवसरेषु कथितः लिखितः विमृष्टश्चास्ति। ४ अक्टूबर ९४ दिनाङ्के भारतस्य माननीयसर्वोच्चन्यायालयेन एष एव संवादः बहुभिः प्रमाणैः सुस्पष्टं कृत आसीत्। अद्यापि नैकैः राजनीतिज्ञैः शिक्षाविद्भिः वैज्ञानिकैश्च एतस्याः भाषायाः सामाजिक-सांस्कृतिक-वैज्ञानिकादिदृष्टिभिः महत्त्वं सम्यक् उद्यमानमस्ति।

एन. सी. ई. आर. टी. द्वारा राष्ट्रियशिक्षानीतौ आवश्यकीयं संशोधनमुद्दिश्य विशेषज्ञानां परामर्शेन यः प्रस्तावः आनीतः, किं च यू.जी.सी. द्वारा राष्ट्रीयचेतनायाः जागरणमभिलक्ष्य विश्वविद्यालयेषु वैदिकगणित-ज्योतिष-कर्मकाण्डादिविषयान् ऐच्छिक-विषयरूपेण पाठयितुं यः प्रसङ्गः समानीतः, तेन कारणेन कैश्चित् तथाकथितैः प्रगतिवादिभिः 'विवादः' प्रारब्धः। तेषां मतेन एतादृशं संशोधनं न केवलं राजनीत्या प्रेरितम्, अपि तु शिक्षायाः 'भगवाकरण' विधातुमेव एतद् उद्दिष्टमस्ति। एषः विवादः बहुषु समाचारमाध्यमेषु बहुधा प्रसारितोऽपि जातः।

विवादमिमाश्रित्य न केवलम् एन.सी.ई.आर.टी., यू.जी.सी. द्वारा अपि तु अनेकैः राष्ट्रचिन्तकैः पूर्वम् उल्लिखितस्य संवादस्य आधारेण राष्ट्रियम् उद्देश्यं किं, तत्र च संस्कृतभाषायाः संस्कृतविद्यायाश्च महत्त्वं किमिति बहुधा स्पष्टीकृतम्।

इदानीं विवदमानाः ते तथाकथिताः प्रगतिवादिनः 'विसंवाद' प्रारभमाणाः दृश्यन्ते। तेषां मतेन आर्याः न केवलं बहिरागताः अपि तु मूलतः ते असभ्याः गोमांसभक्षिणः तथाकथितजातिवादपरायणाः, सामाजिकन्यायविरोधिनः आसन् इति ये वदन्ति अथवा लिखन्ति ते एव सत्यवादिनः प्रगतिवादिनश्च सन्ति। ये मनीषिणः वैदिकं ज्ञानं ज्योतिर्विज्ञानं प्राच्यविद्यां संस्कृतभाषां, तन्निहितां वैज्ञानिकतां च प्रशंसन्ति ते सर्वे साम्प्रदायिकाः रूढिवादिनः, 'भगवा' वर्णभक्ताः इति। एतादृशाः स्वयं भुवः 'प्रगतिवादिनः' सादरं प्रार्थ्यन्ते यत् ते मूलं संवादं जानन्तु। जानन्ति चेत् तद् अवगच्छन्तु। अवगच्छन्ति चेत् तदेव वदन्तु। अन्यथा तेषामातङ्केन गतेषु पञ्चाशदुत्तरेषु वर्षेषु त्रस्ता कुण्ठिता च राष्ट्रियशिक्षा यदिदानीं स्वावलम्बिनी भवितुकामा दृश्यते, सा पुनरेकवारं दुर्बला सङ्कीर्णा च भविष्यति।

'आरण्यकम्' इदं राष्ट्रियशिक्षायां संस्कृतविद्यायाः पक्षान् उररीकर्तुं यथाशक्ति प्रवर्त्तमानं स्यादिति विद्वांसः चिन्तकाः एवात्र प्रमाणम्।



# सितम्बर - २००१

जीवनदर्शनम्, जीवनं जीवनशुद्धिश्च इत्येतानि त्रीणि मानवजीवनस्य वैशिष्ट्यं प्रतिपादयन्ति। तत्र जीवनदर्शनम् आधारः, जीवनम् आधेयम्, जीवनशुद्धिश्च लक्ष्यमिति कथयितुं शक्यते। प्रत्येकम् आदर्शमानवस्य जीवने एतेषु त्रिषु निरन्तरं सामञ्जस्यम् अभिलक्ष्यते। जीवनस्य गतिः स्थितिर्वा धरापृष्ठे भवति, परन्तु तस्य दर्शनं धराया: गर्भे आधाररूपेण तिष्ठति चेत् सा स्थितिः स्पष्टा अचञ्चला च भवति। अतएव, कस्यचित् जीवनं निरन्तरतया समीक्ष्य तस्य जीवनविषयिणी दृष्टिः अस्माभिः ज्ञायते विविच्यते च। यादृशी दृष्टिः तादृशं जीवनम् इत्येष हेतुहेतुमद्भावो बहुधा प्रमाणीक्रियमाणोऽस्ति। अतः जीवने उत्तमानां भौतिकसाधनानां वैशिष्ट्यं न, अपितु उत्तमस्य जीवनदर्शनस्यैव महत्त्वं समधिकं सिद्ध्यति। किमुत्तमं किं चानुत्तमं दर्शनम् इत्येतस्यां विचिकित्सायाम् 'उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत', 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः', 'महाजनो येन गतः स पन्थाः' इत्यादीनि वचनान्यनुसृत्य महापुरुषाणां जीवनं जीवनदर्शनं च श्रेयस्करं मन्येत। एतदर्थं तादृशानां श्रेष्ठानां जीवनचर्या जीवनविषयकं तेषां चिन्तनं च भूयो भूयः समीक्षणीयमस्ति। तद्यथा–जीवने आवश्यकतानुसारं द्रव्यग्रहणं ततोऽधिकस्य च परित्यागः समाजकल्याणाय करणीय इति रघुकौत्साख्यानद्वारा महाकवेः कालिदासस्य जीवनदर्शनम् अस्माभिः समीक्षितुं शक्यते। एवमेव अनुपभुक्तम् असञ्चारितं च धनं मृतं भवति, व्यापारे नियुक्तं सञ्चरणशीलं वा धनमेव उपयोगि भवति इति यदाधुनिकाः अर्थशास्त्रिणो वदन्ति तादृशं प्रमाणं कालिदासस्य काव्येषु ऊहितुं शक्यते।

उत्तमं जीवनदर्शनमाश्रित्य जीवनमेव मनुष्यस्य लक्ष्यं न, अपितु एतस्मिन्नेव जीवने अधिकाधिकं परिशोधनं संस्कारं वा आनीय अपरस्य कृते आदर्शस्थापनं तस्य लक्ष्यं भवति। तद्यथा–याथातथ्येन शारीरिकसम्पर्कद्वारा सन्तानोत्पत्तिक्षमतायां सत्यामपि विवाहाख्यसंस्कारमुखेन सृष्टिनियमसंरक्षणं न केवलम् औपचारिकः कार्यविशेषः, अपितु

शुद्धनियन्त्रितजीवनस्य एकम् अनुकरणीयं स्वरूपं विद्यते। मृत्युः ध्रुव इति ज्ञात्वा राष्ट्रहिताय परोपकाराय वा दधीचिवत् देहत्यागः सर्वेषां कृतेऽनुकरणीयो भवति। एकस्य सत्यवचनस्य रक्षायै श्रीरामद्वारा चतुर्दशवर्षावधिकस्य वनवासस्य स्वीकरणं मानवस्य महामानवपदवीम् अधिरोढुं क्षमतां साधयति। अर्थात्, एतस्मिन् मानवशरीरे एव मानवोत्तरगुणानां विकासद्वारा असाध्यम् अनुकरणीयं किंचित् साधनीयमिति एतादृशो यत्नः करणीयोऽस्ति। अतएव काव्यशास्त्रे उत्तमं काव्यं (इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात्) किम्, व्यवहारशास्त्रे महाजनो विशिष्टो वा जनः ('मानो हि महतां धनम्', 'समबुद्धिर्विशिष्यते' इत्यादि) कः इत्येतादृशानि उत्तमोत्तमलक्षणानि भूरिशः प्रवर्तन्ते। यद्यपि प्रत्येकस्मिन् क्षेत्रे उत्तमता दुर्लभाऽस्ति, तथापि तस्य लक्षणकथनं स्व-स्वक्षेत्र-सम्बद्धेषु शास्त्रेषु प्रवर्तते एव। अर्थात् केवलं मानवरूपेण जीवनम् अथवा काव्यमात्रं रचनीयम् इत्यत्र न सन्तुष्येत, अपितु स्व-स्वक्षेत्रे उत्तमतामधिगन्तुं योग्यताविस्तारोऽवश्यं करणीयः इति भावः सर्वत्र दृश्यते। 'नाल्पे सुखमस्ति, भूमैव सुखम्', 'चरैवेति' इत्यादीनि वचनानि जीवने परिशोधनाय संस्काराय वा निरन्तरं प्रयतितुं जनान् प्रेरयन्ति। अतएव नानाविधैः कारणैः शिक्षा-गणचेतना-भावविनिमय-धनार्जनादिषु प्रसङ्गेषु जायमानं मूल्यापकर्षं वीक्ष्याऽपि मनुष्यः जीवनदर्शनस्य मूल्यं जीवनशुद्धिरूपं लक्ष्यं च न जहाति। मूल्यापकर्षस्य पुरतः मूल्यस्य पराजयं स नैव स्वीकरोति। असत्यस्य कादाचित्कं विजयं दृष्ट्वा 'सत्यमेव जयते' इति मूलं वाक्यं स नैव विस्मरति।

'आरण्यकम्' इदं विविधैरुपायैः उत्तमुत्तमं मूल्यबोधं जनयितुं यतमानमस्ति। अङ्केऽस्मिन् आरातः पूर्वप्रकाशितात् 'मागधम्' इत्याख्यशोधपत्रात् लेखद्वयं साभारं स्वीकृतमस्ति। 'किंचित् पारिभाषिकम्' इति शीर्षकेणैको नवीनः स्तम्भः लभमानोऽस्ति। सर्वत्र विदुषां विमर्श एव प्रमाणम्।



## मार्च - २००२

करालोऽयं कालः। "कालोऽस्मि लोकक्षयकृत्प्रवृद्धो लोकान् समाहर्तुमिह प्रवृत्त" इति श्रीभगवान् गीतायाम् अवोचत्। अस्माकं हीनभाग्यतया आरण्यकस्य पुरोहितः प्रधानसम्पादकमहोदयः पण्डित ब्रजभूषण मिश्र 'आक्रान्तः' ३० मार्च २००२ दिनाङ्के सायं सप्तवादने कालेनानेन समाहृत ऐहिकं लोकं परित्यज्य स्वर्लोकमाप्तवान् इति कष्टेन विवशतया च सूच्यते। कवित्वभावेन नितराम् आक्रान्तः 'आक्रान्त' इति नाम्ना अस्मिन्नखिले भोजपुरमण्डले (पुरातने शाहाबादाख्ये मण्डले च) प्रथितयशाः संस्कृतवाग्विभूषणः पण्डित ब्रजभूषण मिश्रः काव्यशास्त्रविनोदेनैव सम्पूर्णं जीवनं यापयन् आसीत्। भोजपुरमण्डलस्य आरानगरात् अनतिदूरे विद्यमाने पवनाख्ये ग्रामे १९२९ ईश्वीये वर्षे लब्धजन्मा अयं बाल्यकालादेव संस्कृतभाषासाहित्याध्ययने निरतः आसीत्। आर्थिकदुरवस्थाकारणेन अल्प एव वयसि माध्यमिके ततः परम् उच्चे विद्यालये संस्कृतं पाठयन् अपि श्रीमान् आक्रान्तमहोदयः शास्त्राध्ययने काव्यरचनायां च सततं संलग्न आसीत्। अस्य महोदयस्य त्रिषु भागेषु प्रकाशितं 'मारुति संस्कृत अनुवाद सुधे' ति पुस्तकं छात्रेष्वध्यापकेषु चातीव प्राप्तप्रसिद्धि अस्ति। 'मातृस्तोत्रम्', 'संस्कृतनिबन्धसञ्चयनम्' इति ग्रन्थद्वयस्य रचयिताऽसौ 'सुदामचरितम्' 'उपेन्द्र-विज्ञानदर्शनम्' इति ग्रन्थद्वयस्य सम्पादनमपि कृतवान्। जीवनस्य अन्तिमवर्षत्रये लिखितेषु गद्यकृतिषु 'हनुमच्चरितं' सद्यः प्राकाश्यमागमिष्यति। आरण्यकस्यास्मिन्नङ्के तस्य 'ध्रुवचरितं' प्रकाश्यते। आगामिषु अङ्केषु 'श्रवणकुमारचरितं', 'प्रह्लादचरितम्', 'आत्मचरितं' 'चिन्तानानि' च प्रकाशयिष्यन्ते।

आरानगरस्य संस्कृतसेविनां प्रतिनिधिपरिषद्रूपेण १९८७ तमे वर्षे 'संस्कृत-प्रसारपरिषद्' इति स्वयंसेविनी संस्था संस्थापिता। १९८८ तमे वर्षे 'आरण्यकम्' इदं प्रारब्धम्। मूलतः एवं माननीयः आक्रान्तमहोदयः परिषदः अध्यक्षः आरण्यकस्य प्रधानसम्पादकश्च आसीत्। अतीव सरलं जीवनं यापयता आक्रान्तमहोदयेन महता श्रमेण यत् धनम् अर्जितं, तस्य महदंशं प्रदाय परिषदः बहुविधं कार्यं नित्यं संपोषितम्

आरण्यकस्यापि मूलतः प्रकाशनव्ययादिभारः निरूढः। संस्कृताय नैजं सर्वं किमपि समर्पयितुकामेन तेन आरायाम्। अद्वितीयं "मारुतिसंस्कृतशोधसंस्थानं" विनिर्मितम्। तस्यैव प्रेरणया पोषकत्वेन च परिषदा अनेकानि अप्रकाशितपुस्तकानि संपाद्य प्रकाशितानि, आरण्यकमुखेन संस्कृतसौरभसंचयनम् इति ग्रन्थमालाक्रमेण तेषां पुस्तकानां क्रमशः प्रकाशनं जातं जायमानं चास्ति। किमधिकं ब्रूमः परिषदः कार्यालयः 'मारुतिमन्दिरम्' इत्याख्ये तस्य आवासपरिसरे स्वतन्त्रतया विनिर्मिते मारुतिसंस्कृतशोधसंस्थाने एवं विद्यमानोऽस्ति। संस्कृतप्रसारपरिषदः यत् किमपि वृत्तमस्ति, आरण्यकस्यास्य या काऽपि उपलब्धिरस्ति तत् सर्वं माननीय 'आक्रान्त' महोदयस्य कारणेनैव इत्यतः अद्य तेन विहीनेयं परिषत् चन्द्रविहीन आकाश इव संस्मरणीयशोभा जायमानाऽस्ति। आरण्यकं चेदम् अकस्माद् अवलम्बनहीनं सत् मध्येसमुद्रं नाविकरहिता नौका इव संकटापन्नं संजातमस्ति।

एवंभूतायां किंकर्तव्यविमूढतायां कः पन्थाः अस्माकम्? एतस्य यक्षप्रश्नस्य उत्तरमपि पण्डितव्रजभूषममिश्रमहोदस्यैव साधनापूर्णं जीवनं, तपस्त्यागसंपूतं जीवनदर्शनं, निरन्तरध्येयवादः च प्रदातुं क्षमाः सन्ति। अरण्ये ऐकान्तिकतया निरवधि तपश्चरणमिव 'आरण्यकम्' इदं प्रथमकालादेव आक्रान्तमहोदयेनादृतं 'चरैवेति' इति वैदिकम् आरण्यकं वा वाक्यमनुसृत्य प्रचलदस्ति। अद्यापि सूक्ष्मशरीरगतस्य तस्य सूक्ष्मं दृढं च तदेव प्रेरणावाक्यम् अस्माकं पाथेयमस्ति। पण्डित व्रजभूषणमिश्र 'आक्रान्त' महोदस्य आत्मनः परमधाम्नि परमशान्तये परमेश्वरं भूयः प्रार्थयामहे। आक्रान्तमहोदयेन हीनः शोकाकुलः अखिलः संस्कृतप्रसारपरिषत्परिवारः तं प्रति स्वाधमर्णतां विज्ञाप्य भूयः भूयः श्रद्धासुमनोभिः तं दिव्यात्मानं तोषयितुं वाञ्छति। गोलोकवासी पण्डित व्रजभूषणमिश्र आक्रान्तमहोदयः इदानीं स्थूलशरीरेण अविद्यमानोऽपि अस्मासु संस्कृतकार्येषु च सुतरां सूक्ष्मशरीरेण जीवति जीविष्यति चेति विश्वस्य पुनः तस्य आत्मानं प्रति श्रद्धाञ्जलिं विनिवेद्य विरम्यते।

**हे आक्रान्त! विशुद्धात्मन्! संस्कृतवाग्विभूषण!**
**लभतां परमां शान्तिं मारुतेरनुकम्पया।।**



## सितम्बर २००२

लोके परोपदेशे पाण्डित्यं सर्वत्र दृश्यते। शारीरिकं दुःखं भवतु, कोऽपि उपदेशकः सुलभतया उपदिशति – 'प्रातः उत्थाय अटतु, योगाभ्यासं करोतु' आदि। मानसिकस्तापः अस्ति, प्रतिवेशी अथवा कश्चित् अकारणबन्धुरुपदिशति–'कथं त्वम् अशोच्यान् अन्वशोचः? दुःखेषु अनुद्विग्नमनाः स्याः' इत्यादि। कोऽपि तापः सन्तापः वा नास्ति, तथापि कोऽपि सहयात्री सगर्वमुपदिशति-'सर्वैः देशवासिभिः रेलसम्पत्तिः रक्षणीया, सुखदरेलयात्रायै रेलप्रशासनस्य सहायता करणीया' आदि। एवमेव लोकव्यवहारस्य विविधेषु क्षेत्रेषु एकः अपरम् उपदिशतीति दृश्यमतीव सामान्यम्। सोऽपि उपदेशकः अपरस्मिन् स्थले अपरेण केनचित् उपदिष्टो भवतीति उपदेशप्रदानपरम्परा प्रसृता परिलक्ष्यते। किन्तु यस्मिन् विषये कश्चित् तदितरमुपदिशति तस्मिन्नेव विषये तस्य आचरणं सर्वथा निश्चितं नैव लक्ष्यते, अपरं तु तस्य सम्बद्धविषये प्रायशो विपरीताचरणमेव परिलक्ष्यते। अतः एतादृशेन परोपदेशपाण्डित्येन उपदिष्टवाक्यानाम् अननुपालनजन्या अस्वस्थैव परम्परा प्रचलति। स्वपुत्रस्य अधिकगुडसेवनेन क्षुब्धः कश्चित् पिता एकं साधुं तस्य निराकरणोपायं पृष्टवान्। साधुः अपरस्मिन् सप्ताहे पुत्रमादाय आगन्तुमुक्तवान्। यथासमयम् आगतं तत्पुत्रं साधुः अधिकगुडसेवनस्य दोषान् उक्तवान्। गते सप्ताहे एव कथमेते दोषा नोक्ताः इति पृष्टे सति साधुरुत्तरितवान् 'तदा मयाऽपि अधिकं गुडः सेव्यते स्म। इदानीमधिकगुडसेवनं परित्यज्य तस्य गुणान् अवगत्य एव यत् किंचित् उच्यते तदेव प्रामाणिकं खलु?'

संस्कृताध्येतृणां विषयेऽपि उपर्युक्तलोकव्यवहारः प्रायशः परिलक्ष्यते। 'निष्कारणो वेदः षडङ्गोऽध्येयो ज्ञेयश्च' इति उपदेशवाक्यमुद्धरन्तस्ते सामाजिकान् अपरान् बोधयन्ति। शब्दज्ञानसमृद्धये अमरकोशः अभ्यसनीयः, शब्दानुशासनाय कौमुदी नित्यं पठनीया, रम्या रामायणी कथा साक्षात् (न अनुवादपरम्परया) अवगन्तव्या, कालिदासस्य उपमा ज्ञातव्याः, पदलालित्याय नैषधं सेव्यम् इति बहूनि उपदेशवचनानि प्रवचन-निबन्धलेखन-संस्कृतस्तुतिगायनादिषु प्रसङ्गेषु संस्कृताध्येतृणां मुखतः श्रूयमाणानि सन्ति। किन्तु तेषु ये स्वयम् एतान् ग्रन्थान् अभ्यस्य वदन्ति तादृशानां संख्या अतीव

अल्पीयसी एव। क्रमशः अनभ्यासपरम्पराया एषा संख्या ह्रासतां भजमाना दृश्यते इति संस्कृतजगतः कृते उद्वेगस्य चिन्तायाः वा विषय एषः।

संस्कृतेन नवीनानि गीतानि रूपकाणि कविताः कथाः उपन्यासाः आलोचनाः च लिख्यमानाः प्रकाश्यमानाश्च सन्ति। अर्थात् आधुनिककाले साहित्यस्य सर्वविधाः प्रयोगाः संस्कृतेन क्रियमाणाः सन्ति। संस्कृतेन विविधाः पत्रिकाः प्रकाश्यन्ते, दूरदर्शने आकाशवाण्यां च संस्कृतसमाचाराः प्रसार्यन्ते। किन्तु तत्तद्ग्रन्थानां पाठे, संस्कृतपुस्तकक्रयणे, नवीनरचनाविषयकजागरणे, पत्रिकापठने समाचारश्रवणे च प्रवर्त्तमानानां संस्कृतज्ञानां संख्या न्यूना एव। अतः आगामिनि काले एतेषु क्षेत्रेषु संस्कृतस्य दिग्दिगन्तव्यापिनीं विस्तृतिं काङ्क्षमाणानां संस्कृतज्ञानां कृते कदाचित् संस्कृतस्य वर्तमानायाः अपि क्षीणतरा संकीर्णा वा व्याप्तिः दृश्यमाना न स्यात् इत्येतदर्थं सद्यः आरभ्य यत्नः करणीयः। तादृशो यत्नः उद्धरेदात्मनाऽऽत्मानम् इत गीतोपदेशपालनेन प्रारभ्यते। 'धर्मो रक्षति रक्षितः' इति वचनात् संस्कृतभाषासमृद्धिं काङ्क्षमाणानां कृते संस्कृतभाषारचितज्ञानविज्ञानैः आत्मसमृद्धिः साधनीया अस्ति। वैयक्तिकजीवने शास्त्राणि स्वाध्यायद्वारा अभ्यसनीयानि, ततश्च मित्रैः अपरैः सह मिलित्वा एकत्र वाल्मीकि-कालिदास-माघ-भारवि-श्रीहर्ष-बाणभट्टादिकाव्यवाचनपरम्परा च तैः प्रारब्धव्या। केवलमेतेनैव पठन-वाचनक्रमेण जनमनसि संस्कृतविद्यां प्रति या श्रद्धा अन्तर्निहिता विद्यते सा पुनः पुष्टिं प्राप्स्यति। तेषु श्रद्धालुषु केचित् पुनः एतां विद्यां पठितुमवगन्तुं च प्रयतिष्यन्ते, प्रयतमानेषु च केचित् विशिष्टतामवाप्स्यन्ति इति "मनुष्याणां सहस्रेषु" इत्यादि गीतावचनमत्र सफलं भविष्यति। अतः प्राथमिकावस्थायां संस्कृतविद्यायां यत्नशीलानां प्रवृत्तिः स्यात् इत्येतदर्थं संस्कृतज्ञैः पुरोगामिभिः भवितव्यम्। तेषां गृहतः आरभ्य संहतिं यावत् सर्वत्र एतेषां शास्त्राणां काव्यानां च कृते व्यावहारिकी श्रद्धा सुस्पष्टा भवेत्।

संस्कृतभाषा भारतीयसंविधानस्य अष्टम्याम् अनुसूच्याम् उल्लिखितासु भाषासु अन्यतमास्ति। अतः तासां हिन्दी-गुजराती-मराठी-तेलगू-तमिल-बंग-आदीनाम् इव संस्कृतभाषाया अपि आधुनिकभारते समाना मर्यादा स्यात् केन्द्रीयमाध्यमिकशिक्षापरिषदः नवीनपाठ्यक्रमे आङ्ग्लभाषाया अनिवार्यम् अध्ययनं विहितम् अस्ति। ततः परम् आधुनिकभारतीयभाषाया अध्ययनं द्वितीयभाषारूपेण कर्तुं शक्यम्। एतावत्पर्यन्तं संस्कृतं



प्राचीनभाषा (Classical Language) रूपेण परिगणितमस्ति। पालि-प्राकृत-अरबी-पर्सियन इति चतसृभिः भाषाभिः सह पञ्चम-प्राचीनभाषारूपेण संस्कृतस्य परिगणनं क्रियमाणमस्ति। परन्तु ताः चतस्रः संविधानस्य उक्तायाम् अनुसूच्यां गृहीताः न सन्ति। अतः वस्तुतः संस्कृतभाषा हिन्दी-गुजराती-आदिवत् आधुनिकभारतीयभाषा (Modern Indian Language) रूपेण परिगणिता स्यात्। केन्द्र-साहित्य अकादमीद्वारा मान्यभाषासु संस्कृतम् अस्ति, न तु पालिप्राकृतादयः ताः चतस्रः। दूरदर्शन-आकाशवाणीतः आधुनिकभारतीयभाषाभिः समाचाराः प्रसार्यन्ते, अतः तत्र संस्कृतस्य स्थानमस्ति, न तु पाल्यादीनां चतसृणाम्। अर्थात्, संस्कृतम् एका आधुनिकभारतीयभाषाऽस्ति, न तु प्राचीनभाषामात्रम् इति आस्माकीनो विचारः। दुःखस्याऽयं विषयो यत् इदानीमपि भारतीयसंविधाने आधुनिकभारतीयभाषायाः परिभाषा स्पष्टतया कृता नास्ति। भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य पुरतः अस्माकमिदं निवेदनं यत् भारतीयसंविधानस्य अष्टमानुसूच्यां गृहीताः भाषाः 'आधुनिकभारतीयभाषाः' इति स्पष्टं परिभाषिताः भवन्तु। तेन संस्कृतं सांविधानिक-विवेकेन आधुनिकभारतीयभाषारूपेण स्थानं प्राप्तुं शक्ष्यति। भारतीयाः नागरिकाश्च उक्तं मानवसंसाधनविकासमन्त्रालयं प्रति 'अष्टमानुसूच्यां गृहीताः भाषाः आधुनिक भारतीयभाषाः भवन्तु' इति आशयकं पत्रमवश्यं लिखन्तु इति ते बन्धवोऽपि अनुरुध्यन्ते।

आरण्यकस्यास्य संस्थापकः प्रधानसम्पादकः संस्कृतप्रसारपरिषदः अध्यक्षश्च पण्डित व्रजभूषण मिश्र 'आक्रान्त' महोदयः ऐहिकीं लीलां संहृत्य ३० मार्च, २००२ दिनाङ्के दिवंप्रयात इति सम्पूर्णपरिषत् परिवारः अतीव मर्माहतः सन् तादृशं दुःखं सोढुम्, पुण्यात्मनः 'आक्रान्त' महोदयस्य च संस्कृतसेवासरणीमनुसर्तुं शक्तिमिच्छन् परमेश्वरं सुतरां प्रार्थयमानः अस्ति।

अस्मादङ्कात् आरभ्य आरण्यकस्य सहसम्पादकरूपेण डॉ. सुनीलकुमार प्रधानः परिषदः कार्यकारिण्या मनोनीतोऽस्ति। प्रधानमहोदयस्य स्वागतं व्याहरामः।

नानाविधैः कारणैः आरण्यकस्य प्रकाशने विलम्बो जातः। भविष्यति अस्य नियतकालिकं प्रकाशनं सुनिश्चेतव्यमस्ति।

## मार्च २००३

सिद्धि-साध्य-सिद्ध-साधन-साधना-साधक इति परस्पर-सम्बद्धार्थवाचकाः केचन शब्दाः प्रवर्तन्ते। 'सिद्ध-साध्य' इति वस्तुनः धर्मं द्विधा विभज्य आचार्यः मम्मटभट्टः भणति-"सिद्धोऽपि द्विविधः, पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। तत्राद्यो जातिः.... द्वितीयो गुणः। साध्यः पूर्वापरीभूतावयवः क्रियारूपः (काव्यप्रकाशे)।" किन्तु साधनाप्रसङ्गे साधकाः एतेन वस्तुधर्माख्यानेन सन्तुष्टाः न भवन्ति। तेषां कृते अखिलं जगत् केवलं साधनमस्ति, साध्यं नाम ब्रह्मत्वम्। अर्थात् लक्ष्यं न्यूनं संकीर्णं वा न, अपितु 'भूमैव सुखम्, नाल्पे सुखमस्ति' इति भावः राजेत। एतैः शरीरवाङ्मनोभिः अखिलैः साधनैः तादृशं बृहत् साध्यम् अवाप्तव्यं चेत् तत्र महती अविचलिता साधना अपेक्ष्यते। स्वकर्मणा तस्य परमात्मनः अभ्यर्चनां विधायैव तादृशीं सिद्धिं कश्चित् प्राप्तुं शक्नोति।

यथाऽऽह श्रीभगवान् गीतायाम्-

**यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।**
**स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।।** (१८/४६)

परन्तु स्वकर्मद्वारा तदर्चाप्रसङ्गे, संक्षेपेण 'साधना' प्रसङ्गे वा, बहवः शत्रवः बाधकाः वा भवन्ति। गीतायां ते 'कामः क्रोधस्तथा लोभः' इति नरकस्य त्रिविधद्वाररूपेण, श्रीदुर्गासप्तशत्यां मधुकैटभाद्यसुररूपेण अथवा अन्यत्र रामायणादौ खरदूषणादिराक्षस-रूपेण वर्णिताः सन्ति। बाधायां नष्टायां सत्यामेव अभीष्टसिद्धये मार्गः सुकरः भवति। अत एव सर्वविधभारतीयपूजापद्धतौ सर्वादौ विघ्नविनाशकस्य पूजनं क्रियते।

आरण्यकस्याऽस्मिन्नङ्के प्रच्छन्नरूपेण अस्माकं शरीरेषु एव वसताम् अभ्यसूयकानाम् अमरत्वविनाशकानाम् अमरारीणां गीतोक्त-दर्पदम्भाभिमानक्रोध-पारुष्यादीनाम् आसुरसम्पत्तिस्वरूपाणां श्रीदुर्गासप्तशत्यां विविधैः महिषादिभिः असुररूपैः



सह कीदृशी संगतिः अस्ति इति लेखविशेषः प्रवर्तते। भौतिके संसारे एते अस्माकं शत्रवः ऊह्याः विनाश्याश्च इत्यत्र लक्ष्यं स्पष्टमस्ति। एतेषामपरिचयादेव कश्चित् अमेरिकादेशः इराक-देशम् आक्रामति, कश्चित् देशः प्रतिवेशिनि देशे आतङ्कवादं प्रसार्य जनान् घातयति, कश्चित् परपीडनेन आत्मतृप्तिमवाप्नोति इत्येतादृशाः अनर्थाः भवन्ति। वयम् अनर्थान् तान् दूरीकृत्य मानवं जीवनं सार्थकं महत् च साधयितुं यत्नं कुर्यामैव।

'मधुपर्णी' इति कवितासंग्रहस्य समीक्षाऽत्र स्थानम् अवाप्तवती। नवीनग्रन्थानां रचनया तथा च विविधाधुनिकशैलीभिः काव्यादिप्रणयनेन संस्कृतसाहित्यं न केवलम् आधुनिकताम् अवाप्नोति अपि तु इतरभाषागतैः साहित्यैः सह एतस्य सामयिकता सुतरां सङ्गच्छते।

आरण्यकस्य प्रकाशनं गते वर्षे कतिपयैः कारणैः अनियमितं जातम्। इदानीम् एतत् नियतकालेन प्राकाश्यमागच्छति, अग्रेऽपि नियतकालिकता अस्य अनुवर्तेत इति अस्माकं कृते प्रसन्नतायाः विषयः। शिष्या अखिला साधना विदुषाम् आ परितोषाद् एव।

## सितम्बर २००४

**औत्सुक्यमात्रमवसादयति प्रतिष्ठा**
**क्लिश्नाति लब्धपरिपालनवृत्तिरेषा।**

इति अभिज्ञानशाकुन्तले महाकविः कालिदासः। प्रतिष्ठाप्राप्तेः पूर्वं प्रतिष्ठायै जायमाना उत्सुकता तत्प्राप्तेः समनन्तरमेव अवसन्ना भवति, किन्तु प्राप्तायाः प्रतिष्ठायाः सम्यग् रक्षणं कष्टकरं भवति, अपरेषाम् अपेक्षायाः आधिक्यात् स्वस्य क्षमतायाः सीमितत्वाच्च इति श्लोकार्धस्यास्य आशयः। एषा स्थितिः दुष्यन्तस्येव उत्तमस्य विवेकिनः प्रजासेवैकध्येयस्य राज्ञः आसीत्। किन्तु अद्यत्वे न तथा। इदानीं प्रतिष्ठा प्रतिष्ठितस्य औत्सुक्यं नावसादयति, तस्य ततोऽपि अधिकंप्रतिष्ठालोभपरवशत्वात्। पुनश्च, प्रतिष्ठायाः परिपालनं तस्य क्लेशाय न भवति, अपरेषाम् अपेक्षापूर्तिविषयेऽनवधानात् प्रतिष्ठायाः स्वार्थपूर्तिसाधनत्वेन पर्यवसितत्वाच्च। अतः सान्दर्भिक-श्लोकसम्बद्धस्य 'प्रतिष्ठितस्य' समीक्षणं ताटस्थ्येन अकृत्वा प्रतिष्ठां प्राप्तुकामस्य प्रतिष्ठावतश्च बौद्धिकस्तरानुगुणमेव करणीयम्। तच्च न केवलं राजतन्त्रसम्बद्धानां जनानां चारित्रिकविश्लेषणसन्दर्भे, अपितु शिक्षणव्यवस्थासन्नद्धानां तथाकथितानाम् उत्तमोत्तमजनाम् आचरण-समीक्षप्रणप्रसङ्गे अनुध्यातुं शक्यते। राष्ट्रियशैक्षिक-नीतिनिर्धारणावसरे तस्याः समितेः सदस्यताम् अध्यक्षतां वा प्राप्तुं प्रत्यक्षं परोक्षं च महान्तं यत्नं कृतवन्तः तथाकथिताः प्रतिष्ठिताः नीतिनिर्धारणकाले राष्ट्रियं हितम् उपेक्ष्य अतीव संकीर्णतया स्वार्थ-स्वजनहितसाधकं चिन्तनं तदनुगुणं कार्यं च कुर्वन्ति। तद्यथा राष्ट्रियशिक्षानीतौ राष्ट्रधर्मं राष्ट्रसंहतिं राष्ट्रहितं च पूर्णतः पोषयन्त्याः संस्कृतभाषायाः यादृशी गौरवमयी स्थितिः स्यात् सा स्थितिः एतादृशानां तथाकथित-प्रतिष्ठितानां नीतिनिर्धारकाणां स्वार्थसंकीर्णदृष्टेः कारणेन कदापि नागता। तथैव माननीय सर्वोच्चन्यायालयस्य स्पष्टनिर्णयादनन्तरमपि केन्द्रीयमाध्यमिकशिक्षापरिषद् द्वारा स्वपाठ्यक्रमे संस्कृतस्य योग्यस्थानाऽनिर्धारणम्, नवोदयशिक्षापद्धतौ संस्कृतस्य अयोगः विविधासु प्रान्तीयमाध्यमिकशिक्षापरिषत्सु पाठ्यविषयरूपेण पूर्वं प्रचलितस्य संस्कृतस्य उच्छेदः इत्यादीनि कतिपयानि उदाहरणानि तमेव निष्कर्षं पोषयन्ति यत् प्रतिष्ठाप्रणयः एव ज्यायान् न तु जनहितं राष्ट्रहितं वा। एतेन कारणेन तेषां क्लेशः औत्सुक्यस्य अवसानं च मनागपि न लक्ष्येते।

परन्तु परहितार्थं क्लेशमेव स्वीकुर्वन्तः प्रतिष्ठाप्राप्ति पराङ्मुखाः 'एकं लक्ष्यम् एकं जीवनम्' इति ध्येयवादकारणेन संस्कृतसेवामात्रं जीवनस्य लक्ष्यत्वेन आचरन्तः सन्ति केचन सन्तः। तथा संस्कृतमेव सर्वदा सुप्रतिष्ठितं द्रष्टुकामाः, आजीवनं प्रतिष्ठाप्रणयात् बहुदूरं स्थितवन्तः, शयने जागरणे वा, विविक्ते देशे जनारण्ये वा, स्वगृहे वसुधानिलये वा, सुहृत्सु उदासीनेषु वा, मरौ वा सुरम्ये उपवने वा, सर्वथा संस्कृतेव ध्यायन्तः तदेव सेवमानाः संस्कृतजगति पितामहतुल्याः अस्माकम् 'आरण्यक'स्य अस्य परामर्शदातृषु विद्वत्सु वरिष्ठाः **श्रीमन्त पण्डित वासुदेव-द्विवेदिमहोदयाः** इहलोकं परित्यज्य गोलोकवप्रिसनः संजाता इति तन्महाप्रयाण संजातशून्यहृदयाः वयम् एतद् दुःखातिशयेन सूचयामः। 'सार्वभौमसंस्कृतसंस्थानम्' इति वाराणसेय्याः सुप्रसिद्धायाः संस्कृतप्रचार-परायणायाः संस्थायाः संस्थापकाः एते महाशयाः संस्कृतप्रचारसाधकानाम् अनेकेषां गीत-कविता-कथा-कोष-नाट्य-समीक्षादि ग्रन्थानां रचनां कृत्वा न केवलं संस्कृतं सार्वभौमं विधातुं स्वजीवने एव सफलयत्नाः आसन् अपितु आधुनिककालं संस्कृतभाषाव्यवहारकौशलवर्धनशीलानां कृते प्रेरणास्रोतो विशेषरू पेण चिरम् अमरत्वम् अधिष्ठितवन्तः एव सन्ति। पुण्यश्लोकानां पण्डित-द्विवेदिचरणानां स्मृतौ तेषां परमधाम्नि परमशान्तये परमेश्वराय श्रीमते विश्वनाथाय श्रद्धाञ्जलीः समर्पयामः।

कैश्चिद् अपरिहार्यैः कारणैः 'आरण्यकम्' इदं किञ्चिद्विलम्बेन प्रकाश्यमानमस्ति। संस्कृतस्य प्रतिष्ठामेव आत्मनः प्रतिष्ठां मन्यमानम् इदम् आरण्यकं संस्कृतेन संस्कृतस्य यं कमपि समीक्षणीयं पक्षं समीक्ष्य आत्मनः धन्यतां साधयितुं प्रवर्तते।

## मार्च २००६

मानववंशो वर्धते। वर्धमानया संख्यया भारः स्फायते। वसुन्धरा बिभेति, न मानवेभ्यः, अपितु मानवकृतेभ्य इतरप्राणिविनाशकारिभ्यः कार्येभ्यः। सर्वेषां कृते एषा धरित्री, न केवलं मानवानां कृते। किन्तु, मानवः स्वानुकूल्यमेव पश्यति, आत्मरक्षणाय आत्मसुखाय चाऽपरान् जीवान् क्लेदयति नाशयति चाऽपि। मानवस्य रक्षकत्वं भक्षकता भजते। तस्य सर्वे नियमा उपनियमाश्च केवलम् आत्मकेन्द्रं परितो भ्रमन्ति। तेन कारणेन अगाधजलसञ्चारिणो जलजीवाः त्रस्यन्ति, नभश्चरा बिभ्यति, कुक्कुटशावकादारभ्य हस्तिनं यावत् निखिला भूतवासिनो मानवेतराः प्राणिनो निरीहन्ते। इतरेषां स्थावरजङ्गमानां विनाशं कुर्वाणो मानवो मनागपि नावसीदति। तादृशविनाशनप्रवृत्त्या एष स्वजातीयान् मानवानपि हन्तीति महती अनर्थपरम्परा प्रवर्तमाना दृश्यते। एतदनर्थस्य दूरीकरणं परस्परं सद्भाव-सहावस्थानबोधविकासद्वारैव सम्भाव्यते। तदुक्तं गीतायाम्-

**परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।** (गीता ३.११)

अर्थात् मावनकल्याणं मानवेतरकल्याणसापेक्षम् इति मानवो विस्मरति।

एतद् विस्मरणं कथम्? वस्तुतः वंशो द्विधा-विद्यया जन्मना-च, तत्र भवो वंशयः' इति श्रीमद्भट्टोजिदीक्षितः सिद्धान्तकौमुद्यां 'संख्या वश्येन' (२.१.१) इति व्याख्यायां वक्ति। काशिकाकारस्तत्र आह-'विद्यया जन्मना वा प्राणिनामेकलक्षणसन्तानो वंश इत्यभिधीयते' इति। एतद्व्याख्यानुसारं मानववंशस्य द्विविधा धारा विद्यते-एका तु जन्मना वर्धते। जनगणनाऽवसरे तस्या एव गणना भवति। किन्तु अपरा धाराऽस्ति विद्यावंशगता। विद्यया ज्ञानेन सदसद्विवेकेन वा यो मानवः अभिवृद्धिं प्राप्नोति स सर्वेषां कल्याणचिन्तनं करोत्येव। एतया विद्यया मानवस्य संख्यात्मिका वृद्धिर्नैव जायते, अपितु तस्य गुणात्मको विकासो भवति। जन्मवंशजो मानवः तदितरप्राणिवत्



सामान्यः देहैकाभिमानी भवति। यदि एष विद्यावंशजो भवति तर्हि तेन जन्मवंशजस्य मानवस्यापि संरक्षणं सम्भाव्यते। जन्मवंशजानां मानवानां वृद्ध्या ध्वंसभीतिः प्रभवति, किन्तु विद्यावंशजानां मानवानां समृद्ध्या सर्वेषां निर्माणं रक्षणं कल्याणं च संसाधयितुं शक्यते। अतः जन्मादिषड्विकारयुतं मानवजीवनं कृत्याकृत्यप्रवृत्तिनिवृत्तिरूपविद्या-व्यवहारयुक्तं सदैव प्रवर्तेत। तदानीमेव तादृश्या विद्यावंशगतमानवाभिवृद्धेः कारणेन सर्वेषां हितमेव संसाध्येत।

अतो विद्यावंशस्याभिवृद्धेः उपायः अन्वेष्टव्यः। तत्र गीतोक्तिर्विद्यते-

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।**

**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि।।**

(गीता १६/२४)

शास्त्रप्रमाणमाश्रित्य कर्मनिश्चयः कर्तव्यः, तस्मिन् कर्मणि च मानवाः प्रवर्तेरन्। तेनैव विद्यावंशो वर्धेत, विद्यावंशाभिवर्धनेन मानवस्य जन्मवंशः संरक्ष्येत इत्यभीष्टपरम्परा सम्पाद्या भवेत्।

आरण्यकम् इदं तादृशं शास्त्रप्रमाणम् अन्वेष्टुं प्रवर्तते। गते २०६२ तमे वैक्रमे संवत्सरे आरण्यकस्य अङ्कद्वयम् (मार्च २००५ तथा च सितम्बर २००५) अपरिहार्य-कारणवशतः प्रकाशितं नाऽभवत् इति सखेदं वदामः। इतः परमेतत् शोधपत्रं विविधशास्त्रनिष्ठानां विषयाणां सप्रमाणं प्रस्तुतये आत्मानं यथोचितं योजयेदित्येतदर्थं भगवान् विश्वनाथः भगवती अन्नपूर्णा च कार्येऽस्मिन् कृपां विधत्ताम् इति सम्प्रार्थये।

## संयुक्ताङ्कः
## सितम्बर २००६ मार्च २००७

क्रिया सरला। प्रतिक्रिया कुटिला। ज्ञानं स्वल्पम्, प्रदर्शनं महत्। आरोग्यं कादाचित्कम्, अनारोग्यं निरन्तरम्। शरीरं स्थिरम्, मनः चञ्चलम्। भाषणं निर्द्वन्द्वम्, चित्तं सद्वन्द्वमोहम्। वचसि उदारता, चेतसि सङ्कीर्णता। वाण्या पुरस्कारः, व्यवहारेण तिरस्कारः। सदसि वाक्पुटता, आत्मनि निश्शब्दता निस्सङ्गता वा। जीवद्दशायां प्रताडनम्, मरणान्ते माल्यार्पणम्। अन्तःकरणे विशुद्धा नास्तिकता, चित्रपटादेः पुरतः 'प्रसाद' समर्पणम्। अर्थे प्रसक्तिः, धर्मे अनासक्तिः। वृत्ते प्रवृत्तिः, वृत्तौ तटस्थता। गृहे स्वजनन्या उपेक्षा, मन्दिरे प्रस्तरमय्याः देव्याः पुरतः कृच्छ्रसाधना। साधनं मुख्यभूतम्, साध्यम् अज्ञातं विस्मृतं वा। परस्परविरोधिनीनाम् एतासाम् एतादृशानां च वृत्तीनां समवाय एव जीवनम्। एको वदति-जीवनस्याधारा नाम भोजनपानशयनादयो वृत्तयः। अपर आह-आदर्शः सिद्धान्तः मूल्यं वा जीवनस्याधारः। तर्हि को मार्गः श्रेयान्? केनोपायेन एतस्माद् द्वन्द्वान् मोचनम्? द्वन्द्वमिमं कुत्र ब्रूयाम? एकेन कविना एतादृशप्रसङ्गे साङ्कीर्ण्यम् एवं प्रास्तूयत-

**गोपने जीवनग्लानिर्मानहानिरगोपने।**
**अनूढाऽनङ्गव्यथेव ममेयं मानसी कथा।।**

कथं सोढव्योऽयम् अयमसाध्यो द्वन्द्वः?

एतादृशं द्वन्द्वम् आदौ श्रीमद्भगवद्गीता एवं प्रकारेण प्रस्तौति-

**नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः।**
**न चाऽतिस्वप्नशीलस्य जाग्रतो नैव चार्जुन।।** (गीता 6/16)

यः पूर्णतः अनश्नन् भवति तस्य सर्वसिद्धीनां साधनीभूतस्य शरीरस्य पातः सम्भाव्यते। मुख्यसाधने पतिते का कथा साध्यसिद्धेः? एतद्वैपरीत्ये यः केवलम् अशनव्यसनी भवति। तद्वत् केवलं शयानस्य जीवनमूल्यादिविषये निरुत्साहस्य वा जीवनं निरर्थकमेव, तथैव शारीरिकविश्रान्तिम् अपरिगणय्य यः साधनां कुरुते, तस्यापि



शरीररक्षा, साध्यसिद्धिरिति क्रमो भ्रष्टो भवति, आशयोऽत्रैव यत् अन्यतरस्मिन् पक्षे केवलं तत् पक्षाश्रयणेन सार्थकता नास्ति। तर्हि क उपायः स्वीकर्तव्य इति जिज्ञासामुपशमयितुं श्रीभगवान् एवमुवाच-

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नावबोधस्य योगो भवति दुःखहा।।** (गीता 6/17)

अर्थात् शरीररक्षामुद्दिश्य भोजनादिस्वीकरणीयम्, तथा च स्वसहजकर्मणि सर्वदा युक्तचेष्टो भवेत्। शयनं जागरणं चेति उभयमप्यपेक्षितम्। भौतिकदृष्ट्या एताभ्यां शरीरं कार्यक्षमं भवति, क्लान्तिरपि न बाधते। तथा च सूक्ष्मदृष्ट्या शयनं विषयाणां प्रसङ्गे, जागृतिः अवबोधस्य ज्ञानस्य वा विषये इति वक्तुं पार्यते। इतरत्रापि वक्ति श्रीभगवान्-

**या निशा सर्वभूतानां तस्यां जागर्ति संयमी।**
**यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः।।** (गीता 2/64)

तर्हि एतेनोभयविधाचरणेन को लाभः, का च परिणतिः तदेव उक्तं (पूर्वमेव) श्रीभगवता-योगो भवति दुःखहा। दुःखं हन्ति इति दुःखहा। सर्वे प्राणिनः सुखमेव वाञ्छन्ति, न तु मनागपि दुःखम्। तर्हि सुखप्राप्तेः उपायकथनापेक्षया दुःखविनाशोपाय-कथनमेव वरं मनुते श्रीभगवान्। दुःखस्यावश्यंभावित्वात् तस्य नाशोपायश्चिन्त्यते चेत् स्वतः सुखप्राप्तेरुपायो निरङ्कुशो भविष्यति। अतः जीवने पूर्वकथितेषु द्वन्द्वेषु सत्स्वपि अखिलसिद्धिसाधनीभूतस्य शरीरस्य रक्षायै आवश्यकीयमशनादि कर्म कुर्वाण एवं मूल्याधारितं जीवनं जीवेन्मनुष्य इति तात्पर्यम्।

एतादृशं किमपि मूल्यं स्वशरीरेण संसाधयितुकाममिदम् आरण्यकं गतेषु वर्षेष्विव ऐषमोऽपि प्रायतत। व्यावहारिककाठिन्याद् 2063 विक्रमसंवत्सरस्य आश्विनमासस्य अङ्कः (सितम्बर 2006) प्राकाश्यं नागत इति सखेदं सूच्यते। तद्धेतुनाऽयं विशेषाङ्कः (सितम्बर, 2006 - मार्च 2007) अङ्कद्वयविषयं स्वाङ्के निधाय प्रकाश्यमानोऽस्ति। आगामिनि काले पत्रस्याऽस्य नियतकालिकता यथा न व्याहन्येत तथा प्रयतिष्यते।

अङ्केऽस्मिन् वेद-वेदाङ्गदिविषयकैः लेखैः सह दार्शनिका विषया अपि स्थानं लभन्ते। आरण्यकमिदं स्वाध्यायेन स्वाध्यायप्रणयिनां श्रमेण च सततं पुष्टिं यायादिति अभिप्रेत्य समेषां विदुषां सदाशयतां सम्प्रार्थ्य अत्रैव साङ्गीक्रियते।

## संयुक्ताङ्कः

## सितम्बर २००७ - मार्च २००८

समतायाः प्रशंसा सर्वत्र क्रियते, विषमतायाम् अश्रद्धा ऊह्यते। विश्वस्मिन् स्थानकालपात्रम् अविशिष्य समता राजताम्, तत्प्राप्त्युपायाश्च अन्वेष्टव्या इत्येतादृशो विमर्शः अधिपृथिवि प्रवर्तमानो दृश्यते। कैषा समता? कुत इयं प्रभवति? कुत्र तिष्ठति? कथं चाऽऽप्तव्या? इति जिज्ञासाशृङ्खला पुरत आयाति। समता समत्वं साम्यमिति 'समस्य भावः' इत्यस्मिन्नर्थे पर्यायभूताश्शब्दाः। समः कः? विषमाऽभावः समः। सम एव विषमं सूचयति। छन्दश्शास्त्रे सम-अर्धसम-विषमेति छन्दांसि प्रथन्ते। अर्थात्, विषमे सम्भाविते समस्य प्रवृत्तिः। संसारे प्रतिसृष्टि आकारदृष्ट्या विषमतैव परिलक्ष्यते। कोटिशो मनुष्येषु प्रतिजनम् आकृतिः भिद्यते। तथैव इतरेषु जङ्गमेषु स्थावरेष्वपि। कदाचित् पशुषु समाकृतिष्विव दृश्यमानतायां सत्यामपि तेषां परस्परं प्रकृतिवैषम्यं तु भवत्येव। समाकृती धेनू समकालं न प्रसुवाते, न च समपरिमाणं दुग्धं ददाते। एवम् अवश्यम्भाविनि नैसर्गिके वैषम्ये कीदृशी समता अपेक्ष्यते, कथं च साऽवाप्येत इति मौलिकः प्रश्नः समुदेति।

गीतायां श्रीभगवानुवाच-**'समत्वं योग उच्यते'** (२.४८) इति।

अत्र समत्वम् उद्देश्यं योगश्च विधेयः। एतस्य सिद्धान्तस्य उच्चमानता वेदादिशास्त्रैः पूर्वसूरिभिश्च असाध्यत, मया तु केवलम् एषः अनूद्यतेऽत्र न तु ऐदम्प्राथम्येन प्रथ्यते इति श्रीभगवत आशयोऽत्र ऊह्यः।

**'योगश्चित्तवृत्तिनिरोधः'** इति पतञ्जलिः योगसूत्रे। अतो गीतोक्तो योगसिद्धान्तः 'समत्वं चित्तवृत्तिनिरोधः' इति वाक्यान्तरे पर्यवस्यति। तत्रैव गीतायाः शिष्टा अंशा एवं सन्ति-

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।**
**सिद्ध्यसिद्ध्योः समो भूत्वा. . . . . . . . .।।** (२-४८) इति।

योगसूत्रस्थयोगपरिभाषामादाय गीतोक्तस्य श्लोकस्य आशयान्तरम् एवं विमर्ष्टुं शक्यते यत् यः योगस्थः सन् कर्माणि न कुरुते सः सङ्गं न त्यजति, सिद्ध्यसिद्ध्योश्च



समो न भवति। योगस्थितिः सङ्गत्यागे यथा हेतुः भवितुमर्हति तथा सिद्धावसिद्धौ च समभावम् आदातुं सैव शक्ता अस्तीति तात्पर्यमत्र स्फुटं भवति। अन्ततः समभावं समत्वं वा 'योग'रूपेण उपन्यस्तुं प्राभवत् श्रीभगवान्।

उपर्युक्तं विवेचनमिदं बोधयति यत् योगो नाम कश्चित् अन्तर्गतो बोधः येन चित्तस्य वृत्तिद्वयी निरुध्यते-एका सङ्गो नाम विषयेषु आसक्तिः, अपरा च सिद्धौ असिद्धौ असमता। एतां सहजतया लोकव्यवहारे दृश्यमानाम् असमताम् आशङ्क्य तां परिहर्तुं श्रीभगवान् अनेकश उपदिशति, तद्यथा-

**समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते।** (४.२२)

**समः शत्रौ च मित्रे च तथा मानाऽपमानयोः।**
**शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।** (१२.१८)

**आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।**
**सुखं वा यदि वा दुःखं स योगी परमो मतः।।** (६.३२)

अर्थात्, मनुष्यः सिद्धौ सफलतायां वा, मित्रे सम्प्राप्ते, मानेऽधिगते, सुखे चाऽनुभूते यथा व्यवहरति तथा असिद्धौ सत्यां, शत्रौ समायाते, अपमानेऽधिगते दुःखे चाऽनुभूते तद्वैपरीत्येन व्यवहरति। तद्वत् शीते उष्णे च तस्य व्यवहारः प्रत्येकं भिद्यते। किञ्च, एष व्यवहारः अतीव सहजः, तदर्थं कुत्रचित् न किमपि प्रशिक्षणं प्रदीयते, न च तदर्थं कश्चित् उपदिशति। यथा कश्चिदितरप्राणी वृष्टौ आतपे वा स्वयमेव कञ्चित् आश्रयं काञ्चित् वृक्षच्छायां वा आश्रयितुं स्वतः यतते तथा मनुष्योऽपि। तथैव सुखसाधनेषु स्रक्चन्दनादिषु स्वत एव तस्य प्रवर्तनं लक्ष्यते। तथैव मानसवृत्तावपि यथा कल्पना तथा कञ्चित् विषयं जनं स्थलं वा प्रति द्वेषः अथवा आत्मीयता उत्पद्यते। तत्र तस्य विषयस्य वैशिष्ट्यं न हेतुः, अपि तु तादृशहानोपादानबुद्धये मानसकल्पना एव हेतुः भवति। तद्यथा उक्तं स्वप्नवासवदत्तनाटके महाकविना भासेन-

**प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।** (प्रथमोऽङ्कः)

तत्र यदि बौद्धिकप्रसङ्गे उभयोः विपरीतधर्मयोः कृते समाना बुद्धिः प्रवर्तते तर्हि सः समबुद्धिसम्पन्नो जनः भिन्न-भिन्नव्यवहारप्रवृत्तिधर्मणो चित्तस्य वृत्तिं निरुध्य समभावं सम्पादयति, तेन च वस्तुतो योगं संसाध्य संसारे विशिष्टताम् अधिरोहति। उक्तं च गीतायाम्-

**समबुद्धिर्विशिष्यते।** (६.९)

पक्षान्तरं च प्रस्तूयते गीतायाम्-

**समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।। (९.२९)**

अर्थात्, ईश्वरस्वरूपः विषयविशेषः सर्वेषां कृते समभावेन स्थितोऽपि केनचित् द्वेष्यतया केनचिच्च प्रियतया दृश्यते। यथा कस्यचित् आकृतिः वचनं व्यवहारः च तदितरेषां सर्वेषां कृते समानाः सन्तोऽपि भिन्नभिन्नग्राहकद्वारा भिन्नभिन्नतया स्वीक्रियन्ते, कस्मैचित् सा आकृतिः सुन्दरी प्रतीयते, कस्मैचिच्च नैव सा रोचते। तद्वद् वचनव्यवहारादीनि समान्यपि बोद्धृसापेक्षतया भिद्यन्ते। श्रीमद्भागवते कंसराजप्रासादे स्वाग्रजेन सह रङ्गपीठं प्रविष्टस्य भगवतः कृष्णस्य चित्रमेवंरूपेण प्रस्तुतमस्ति-

**मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्**
**गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः।**
**मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां**
**वृष्णीनां परदेवतेति विदितो रङ्गं गतः साग्रजः।।**

(श्रीमद्भागवतम् १०.४३.१७)

अत्र यद्यपि बालः कृष्णः अग्रजेन सह समभावेन प्रवर्तते, किन्तु तस्मिन् मल्लाः वज्रे इव घातकतां पश्यन्ति, तथैव स्त्रियः कामदेवम्, गोपाश्च स्वजनताम्, दुष्टा राजानः शासकविशेषम्, देवकीवसुदेवौ शिशुकृष्णम्, कंसश्च मृत्युम्, योगिनः परमं तत्त्वं परमात्मानं वा पश्यन्तः सन्ति इति तत्तद्बोद्धृगततत्तत्कल्पनासम्भूता भावाः समुत्पद्यन्ते, किञ्च अनन्तरं तदनुसारं भगवतः तत्तद्बोद्धनुरूपं व्यवहारोऽपि प्रावर्तत, उक्तं च भगवता गीतायाम्-

**ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्।।** (४.११)

अतः यादृशी श्रीभगवतः समदृष्टिः तादृशी समदृष्टिः बोधदशायां भवितुम् अर्हति। दृश्यविषयाणां आकृतिषु समता शक्या नास्ति, तेषु द्वेष्यता प्रियता वा दर्शकस्य संकल्पात् उपजायते। एतेन कारणेन समभावं समुत्पादयितुं विद्यालयेषु विविधकार्यालयेषु आरक्षकेषु सैन्येषु वा तत्तद्गतबालादीनां गणवेशधारणं नियम्यते, समूहप्रार्थनासभा आयोज्यते, समूहभोजनशाला व्यवस्थाप्यते। तेषु तेषु प्रसङ्गेषु समाजस्य आर्थिक-सामाजिकादिवैषम्ये परिपालिता अपि जनाः समवेश-प्रार्थनादिप्रसङ्गैः दर्शकदृष्ट्या समतां भजन्ते। तेषु तत्तद्गतवैषम्ये स्थितेऽपि तान् प्रति द्वेष्यता प्रियता वा विशिष्टतया यथा नोत्पद्येत तदर्थं तेषां गणवेशादि आचरणीयम् इति कल्पना समाजे समभावसमुपासकानां



मनसि आगता स्यात्। अतः दर्शके समत्वाख्यं योगं सम्पादयितुं तद्गतायाः चित्तवृत्तेः साङ्कर्यं निरोद्धुम् एते वेश-भोजनासनादिसाम्यं भौतिकरूपेण निरूप्यते। एतादृश्या दृष्ट्या दर्शकः सर्वत्र ईश्वरसत्ताम् अनुभवितुं सर्वान् समभावेन पश्येदित्यत्र आशयो विद्यते। तद्यथोक्तम् गीतायाम्-

**समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्।**
**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम्।।** (१३.२८)

एतादृशसमभावेन आत्मना आत्मनः हिंसनं प्रतिषिध्यते, ततश्च श्रेष्ठा गतिर्लभ्यत इत्यत्र भावः। अर्थात् अन्तरङ्गतया समदृष्टेः अभावेन सर्वत्र विद्यमानोऽपि ईश्वरो न दृश्यते नानुभूयते वा, तेन च आत्मा एव आत्मनः शत्रुवत् आचरति, अन्तः भेदबुद्धेः प्रवेशात् सर्वदा च अन्तर्द्वन्द्वसद्भावात्। अतः समत्वबुद्ध्या न केवलं येषां कृते एषा बुद्धिः तेषां कल्याणं भवति, अपितु समत्वबुद्धिसम्पन्नस्य सर्वत्र समं पश्यतो वा जनस्याऽपि आत्मा स्वस्य हिंसको न भवतीत्यतः स्वस्याऽपि कल्याणं सम्पद्यते। अत एव समत्वम् एव योगः, तादृशे योगे स्थितेन सता कर्माणि करणीयानि इति **योगस्थः कुरु कर्माणि** इति पूर्वोल्लिखितस्य श्लोकस्याऽयं भावः ऊहितुं शक्यः।

**आरण्यकम्** इदं स्वप्रभवकालाद् आरम्य चतुर्दश वर्षाणि यावत् विविधेषु विषयेषु विविधैः जनैः संस्तुतेषु समीक्षितेषु च प्रसङ्गेषु समत्वबुद्ध्या प्रवर्तितुं यतमानम् अस्ति। न मे द्वेष्योऽस्ति न प्रियः इति वचनमुचितमपि एतदनुपालने सर्वेषां सामान्यानामिव आरण्यकस्य कष्टजातमपि अनस्वीकार्यमस्ति। द्वन्द्वाः मोहाश्च संसारे आकर्षणहेतवो भवन्ति। तत्र **ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः** (गीता ७.२८) इति परिपालयितुकामेनाऽनेन दृढव्रतेन भवितव्यमिति विचिन्तयताऽपि आरण्यकेन सर्वथा व्रते दार्ढ्यम् अनुसर्तुम् अवश्यं क्षमेण स्थीयते इति स्थैर्येण कथयितुमपि न प्रभवामः। तथापि अनाकाङ्क्षितेषु व्यवधानेषु आगतेष्वपि **आरण्यकम्** उपर्युक्तं धर्ममपरित्यज्य सुतरां प्रवर्तेत इति आकाङ्क्ष्य तदर्थं पाठक-लेखक-समीक्षकाणां विदुषां सौहार्दं च आशास्य विरम्यते।

## सितम्बर २००८

संसारे सर्वेषां ज्ञानविज्ञानसम्बद्धानां विषयाणां तत्त्वानि विमृश्यन्ते, समीक्ष्यन्ते ऊह्यन्ते च। विषयो नित्य उत तद्गतं तत्त्वं नित्यमित्यपि विविच्यते। नित्यानित्यलक्षण-निरू पणप्रसङ्गे महर्षिः पतञ्जलिराह-

**अथवा नेदमेव नित्यलक्षणम्-ध्रुवं कूटस्थमविचाल्यनपायोपजनविकार्य-नुत्पत्त्यवृद्ध्यव्यययोगि यत्तन्नित्यमिति। तदपि नित्यं यस्मिंस्तत्त्वं न विहन्यते** इति। (पस्पशाह्निकम्) अर्थात् 'जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति' इति षड्भावविकाराः यस्य न सन्ति तद् 'ब्रह्म' अनाद्यनिधनम् 'आत्मा' इत्यादिपदवाच्यं यत् किञ्चिद्वस्तुजातं तु नित्यपदवाच्यं भवति। किन्तु यस्य वस्तुनः एते विकाराः भवन्ति यद्वा उत्पत्तिविनाशशीलं भवति तादृशं घटपटाद्यपि वस्तु नित्यपदवाच्यं भवितुमर्हति इति तर्कान्तरं प्रस्तुवन् भाष्यकारो ब्रवीति-**किं पुनस्तत्त्वम्? तस्य भावस्तत्त्वम्। आकृतावपि तत्त्वं न विहन्यते** इति। अर्थात् वस्तुनो भावः एव तत्त्वपदवाच्यो भवति। वस्तुनि विनष्टेऽपि एष तत्त्वाख्यो भावोऽविनाशी तिष्ठति, तद्यथा एकस्मिन् घटे नष्टेऽपि तद्गतो प्राणप्रदः धर्मः घटत्वं न नश्यति। अतः तादृश्याम् आकृतौ जातौ वा तत्त्वं नाम घटत्वं सुरक्षितं तिष्ठति। किं च इह दृश्यमानो घटः स्थानान्तरे दृश्यमानात् घटात् भिन्नो भूत्वापि तद्गततत्त्वविशेषकारणेन 'घटः' इति परिचीयते। तथा च इदानीं दृश्यमानात् घटाद् अनन्तरं दृश्यमानस्य घटस्य भेदे सत्यपि अभिन्नतया यद् 'घट' इत्येवंप्रकारेण अवगम्यते तत् तद्गतस्य तत्त्वस्य घटत्वस्य कारणेन इति विमृश्य एषा नित्यता **प्रवाहनित्यता** इति उक्तभाष्यवृत्तौ वदति आचार्यो नागेशः-

**यस्मिन् विहतेऽपि तद्वृत्तिधर्मो न विहन्यते इत्यर्थः। प्रवाहनित्यता चानेनोक्ता। तन्नाशेऽपि तद्धर्मो न नश्यति। आश्रयप्रवाहाविच्छेदादिति भावः** (उद्द्योतः, पस्पशाह्निकः)। प्रवाहनित्यता नाम वस्तुनः अवस्थान्तरप्राप्तौ सत्यामपि वस्तुनिष्ठप्रवाहपरम्पराया अव्याहततेति। तद्यथा-गङ्गोत्र्याः निष्क्रान्ता जलधारा



कनखले यादृशी यत्परिमिता च भवति वाराणस्यां ततः सुतरां भिद्यते, किन्तु उभयत्र प्रवाहनित्यताकरणेनैव सा 'गङ्गा' पदवाच्या भवति। तद्वच्च शिशुः मोहनः युवा भूत्वा दृश्यान्तरतामाप्नोति चेदपि मोहनपदवाच्यतां नैव जहातीति तस्य आश्रयप्रवाहस्य अविच्छिन्नता ऊहितुं शक्येति भावः। एतत् नित्यं विद्यमानं तत्त्वं वाच्यं न अपितु व्यङ्ग्यमेव भवति। बहुषु स्थलेषु 'घट' 'घट' इति प्रायः समानाकारान् घटान् वीक्ष्य तद्व्यङ्ग्येन घटत्वेन एषः घटः सोऽपि घट इति परिचयो लभ्यते इति एषः पदार्थवृत्तिधर्मः तत्त्वमिति अत्राशयः स्फुटः। तदेव स्पष्टीकरोति श्रीरुद्रधरझाशर्मा उक्तभाष्योद्द्योतटीकायां तत्त्वालोके-**तत्त्वम् अर्थात् तद्व्यङ्ग्यजातिरूपस्तद्वृत्तिधर्मः** इति।

शास्त्राणां विषयेऽपि तद्गततत्त्वानाम् अविहतता एवम् ऊहितुं शक्यते। प्राचीनकालत आरभ्य आधुनिककालं यावत् शास्त्रविषयकविमर्शप्रसङ्गे वाक्य-व्यवहारस्य व्यापकता विविधता च साक्षात्कर्तुं शक्यते। पूर्वमतखण्डनपुरः-सरस्वर्तमतमण्डनरीतिः सर्वथा संलक्ष्यते। किन्तु एतेषु परिवर्तनेषु तदेकं वैशिष्ट्यं किमपि अपरिवर्त्तितं सत् तिष्ठतीति तत् तत्त्वपदवाच्यं भवितुमर्हति। तदस्ति शास्त्रकाराणाम् 'आस्तिक्य' बुद्धिः। सर्वेषां शास्त्राणां प्रवर्तते, संरक्षणे विस्तारे च तदेकम् आस्तिक्यं प्रवाहनित्यता इव सर्वथा दृश्यमानं भवति। ब्रह्मकर्मविवेचनप्रसङ्गे गीतायामुक्तमस्ति श्रीभगवता-

**शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च।**
**ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्।।** (गीता 18.42)

अत्र आस्तिक्यं व्याचक्षाणेन श्रीमच्छङ्कराचार्येण **आस्तिक्यम् अस्तिभावः** इत्युच्यते। तत्र श्रीनीलकण्ठो ब्रूते-**आस्तिक्यं श्रद्धा**। श्रीमधुसूदनः **आस्तिक्यं सात्त्विकी श्रद्धा** इति व्याख्याति। तत्रैव श्रीदेवलवचनमुद्धृत्य श्रद्धायाः स्वरूपं विवृण्वता श्रीमधुसूदनेन-

**प्रत्ययो धर्मकार्येषु तथा श्रद्धेत्युदाहृता।**
**नास्ति ह्यश्रद्दधानस्य कर्मकृत्यप्रयोजनम्।।**

इत्यपि उक्तम्। गीताया उक्तम् आस्तिक्यम् **आस्तिकस्वभाव आगमोक्तार्थेषु श्रद्धधानता** इत्येव व्याख्यातं भोज्योत्कर्षदीपिकायाम्। श्रीधरीव्याख्यायाम् उक्तमस्ति-**आस्तिक्यम् अस्तिपर लोक इति निश्चयः** इति। गीतायाम् उक्तेषु ब्राह्मणानां

स्वभावजेषु शमादिषु कर्मसु एतद् 'आस्तिक्यं' किञ्चिद् वैशिष्ट्यम् आतनोति। तच्च श्रद्धापदवाच्यमिति प्रायशः सर्वे व्याख्याकारा आहुः। सा च श्रद्धा सात्त्विकीति श्रीमधुसूदनश्चाह।

**सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत।** (गीता 17.3)

इत्यत्र श्रद्धायाः सत्त्वानुरूपत्वं विवृण्वन् श्रीमच्छङ्कराचार्यः विशिष्टसंस्कारोपेतान्तःकरणानुरूपा सर्वस्य प्राणिजातस्य श्रद्धा भवतीति वदति। अर्थात् प्राणिषु तद्गतसंस्कारमनुसृत्य श्रद्धा भवति। एषा श्रद्धा तेषां चित्रवृत्तौ अस्तिभावं जनयति, एष अस्तिभाव एव आस्तिक्यम् उच्यते। क एष अस्तिभावः? अखिले जगति नित्यं प्रवर्तमानेषु परिवर्तमानेषु च विषयेषु एकः कश्चित् नित्यधर्मः अविहततया अस्ति इति यः भावः प्राणिनां चेतसि उदेति स अस्तिभाव आस्तिक्यम्। अर्थात् नासीत्, नास्ति, न भविष्यति इति सर्वविधेषु विषयजातेषु साक्षाद् दृश्यमानतया यः नास्तिबोधः नास्तिक्यं वा प्रत्यक्षं परोक्षं वा अस्मान् अनुशास्ति तद् विरुद्ध्य आत्मनि एष बोधः जागरणीयो यत् सर्वेषु एतेषु नास्तिषु एकं किंचित् 'अस्ति' इति, अन्यथा नास्तिपदवाच्यानाम् एतेषामपि प्रवृत्तिरशक्या इति काचिद् एतेषां स्थायिहेतुकता अन्वेष्टव्या, तेन च व्याजेन एतेषु प्रवृत्ति-स्थिति-संहरणशीलेषु जागतिकवस्तुषु अपि एका प्रवाहनित्यता अनुभूतिक्षमा भवितुम् अर्हति।

अस्ति इति अस्तिकम्, तस्य भाव आस्तिक्यं तच्च सर्वत्र नास्तिभावेषु विद्यमानेषु अस्तिभावं च नयन्ती 'श्रद्धा' इति पूर्वोक्तं मतम् आश्रित्य अस्माकं शास्त्राणि प्रवर्तितानि सन्ति। तर्कतर्कान्तरमतमतान्तरवाक्यवाक्यान्तरादिपरस्परविरुद्धस्वरूपाणि आवहन्त्यपि तानि आस्तिक्यम् अजहन्ति परिलक्ष्यन्ते। द्वैत-द्वैताद्वैत-विशिष्टाद्वैतादिभिन्नभिन्नमतानि पोषयन्त्यपि वैचारिककेन्द्राणि मूलतः यत् आस्तिक्यम् आश्रयन्ति तदेव अस्माकं शास्त्रपरम्परागतं तत्त्वम् इति कथयितु शक्यते। अत एव शास्त्रकाराणाम् एषा आ बहुकालात् प्रवाहनित्यता सुतराम् ऊहनीया। एतेन कारणेन अविच्छिन्नगत्या प्रवहन्ती सर्वत्र च 'गङ्गा' इति अभिधेयतां प्राप्नुवती गङ्गानदी इव शास्त्रीयचिन्तनपरम्परा निरन्तरं प्रचलन्ती विद्यते।

काव्यशास्त्रे रसविषयकचर्चायां प्राचीनतायां सत्यामपि आधुनिकपरम्पराम् अविहतगतिं साधयन् रसगङ्गाधरे रसनिष्पत्तिविमर्शः आरण्यकेऽस्मिन् विद्यते। रामायणगतानि राजनीतिकमूल्यानि आधुनिकसन्दर्भतुल्यानीति समीक्षणमपि तदेव



तत्त्वचिन्तनं पोषयति। संसारसृष्टिविषये नासदीयसूक्तगतं रहस्यचिन्तनम् आधुनिककाले जगति प्रवर्तमानं सृष्टिविषयकरहस्यजिज्ञासां समाधातुं प्रवर्तते। भगवतः अवतारविषयेषु या काचित् शास्त्रीयधारणा प्रवर्तिताऽस्ति तस्याः रहस्यभेदनेन तद्गतं तत्त्वं विनिश्चेतुं शक्यते। व्रताचरणैः व्यक्तित्वविकासः कथं साधयितुं शक्यते इति विमर्शेन व्रताचरणस्य आधुनिकी प्रासङ्गिकता पोष्यते। मनसः स्वरूपस्वभावविमर्शपूर्वकेण विमर्शेन एतद्विषयकः आधुनिकः शोधः, पुष्टिं गच्छेत्। काव्येषु सामान्यतः कवेरभिप्रायः गूढतया यथा निहितो भूत्वा काव्यस्य सद्यःपरनिर्वृतिसाधनतां साधयति तत् सामान्यतया पुनश्च कविकुमारदासस्य रचनाविशेषविमर्शद्वारा विशिष्टतया समीक्षितुमिष्यते।

आरण्यकस्य वर्तमानेऽङ्के एतेषां विषयाणां सन्निवेशद्वारा तदेव आस्तिक्यम् अस्तिभावः श्रद्धा वा सम्पूर्णशास्त्रचिन्तनपरम्परायाः प्रवाहनित्यतां साधयितुं कश्चित् प्रयत्नः परिलक्षितुं शक्यते। एतदेवास्ति एतस्य शोधपत्रस्य आत्मगतम् आस्तिक्यम् किं च सर्वेषु प्रसङ्गेषु एष अस्तिभावः प्रभवतु इति वैचारिकसङ्क्रान्तौ प्रवर्तिष्यमाणता चेति श्रद्धया विश्वसिमः।

## मार्च २००९

सूदूरम् अतीतम्। स्मृतेरपि प्राक्, केवलं श्रुतिः। श्रुतिपरम्परा, सैषा भारतीया। मध्येकालं सहस्राणि वर्षाणि। अगणिता जीवनधारा प्रवाहिता। असंख्यानि परिवर्तनानि संजातानि। पुराणेषु राजवंशद्वारा कालगणनारीतिः आसीत्। एवमेव कालावधावस्मिन् अनेके राजवंशा आगताः, अपरिमितानि राजवंशानुचरितानि घटितानि। तेषु कानिचन उल्लिखितानि, शिलालेखादिषु उट्टङ्कितानि, कानिचन ऊह्यानि च। सेयं सुदीर्घा पृथिव्यामस्यां दीर्घतमा च भारतीया संस्कृतिः पुरातनी, प्राचीना वा जगतीतले सुविख्याता।

भारतीया संस्कृतिरियं सर्वप्राचीना, सर्वासु उपलब्धासु संस्कृतिषु पुरातनतमा इत्यतः एषा वयसा सर्वतो ज्येष्ठा विद्यते। किन्तु आयुषा एषा सर्वविधसंस्कृतिभ्यः ज्येष्ठत्वेन वृद्धत्वमाप्त्वा पूज्यत्वमाप्नोत् इति न, अपि तु एतस्या वृद्धत्वम् आदिमावस्थायामेव आसीत्। वस्तुतः वृद्धत्वं द्विविधं मन्यते- १. वयोवृद्धत्वम्, २. धर्मवृद्धत्वं च। भारतवर्षे आदिकालाद् वयोवृद्धत्वापेक्षया धर्मवृद्धत्वम् समधिकमादृतं चर्चितं शंसितं च। यूनो राज्ञो दिलीपस्य धर्मेण वृद्धत्वं प्रशंस्य महाकविः कालिदासो ब्रूते-

**तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना।** (रघु.१.२३)

शङ्करमवाप्तुकामां कठोरं तप आचरन्तीं पार्वतीं दिदृक्षवो वयोज्येष्ठा वृद्धास्तपस्विनः समागच्छन्ति स्म। तत्र च महाकविः वृद्धत्वविषये भारतीयां दृष्टिं स्पष्टतरामभिधत्ते-

**न धर्मवृद्धेषु वयः समीक्ष्यते।** (कुमार. ५.१६)

बालको ध्रुवो भगवन्तम् अवाप्तवान्, तथैव बालकः प्रह्लादो दृढभक्त्या नरहरिरूपधारिण आविर्भावाय निमित्तभूतोऽभवत्। बाल्यावस्थायामेव महामुनिः शुको ब्रह्मवित्त्वं समध्यगच्छद् इत्येतादृशानि असंख्यातान्युदाहरणानि भारते



ज्ञानमुखेनाप्तस्य धर्मवृद्धत्वस्य वैशिष्ट्यम् उररीकुर्वन्ति। अतो भारतीया संस्कृतिः अतिप्राचीना अतिवृद्धा वेत्यतः पूज्या वरेण्या वेति न, अपि तु अस्या भारतत्वं सर्वं किमपि अवस्थादेशकालादिगतं लघु लघु वैशिष्ट्यमतिशय्य विराजते। भायां रतं = भारतं, तस्य भावः भारतत्वं नाम भायां तेजसि सर्वतो दीप्तिमति धर्मप्रणोदिते गुणविशेषे क्रियाविशेषे वा रतं रमणशीलम् अत्र चैतन्यमिति विशेषः। कठोपनिषदि बालस्य नचिकेतसो नित्यानित्यवस्तुविवेको मृत्युमपि आश्चर्यान्वितीकरोति। सावित्र्याः सुदृढं पातिव्रत्यं नैष्ठिकं धैर्यं च पतिं सत्यवन्तं मृत्युलोकात् पुनर्मर्त्यलोकं प्रत्यावर्तयति। रणाङ्गने एकाक्यपि बालोऽभिमन्युः सप्तभिः वयोज्येष्ठैः महारथिभिः सह स्पर्धितुं प्रभवति। आदिशङ्कराचार्येण बाल्यावस्थायामेव विदितवेदितव्यता समर्जिता। युवाऽवस्थायामेव शिकागोधर्मसम्मेलने भारतीयधर्मध्वजां समुत्तोलयता स्वामिविवेकानन्देन वैश्विके इतिहासेऽनुपमा कीर्तिः संस्थापिता। एवंप्रकारेण भारतवर्षे सर्वथा भायाः प्रतिभायाः वा कारणेन श्रेष्ठताम् आपद्यमानानां महत्ता प्राशस्त्यं प्राशंस्यं चाधिजगाम, न तु केवलं वयोज्येष्ठता। भारतीयायाः शेमुष्या विशिष्टतां पोषयन्तं चित्रविशेषं प्रस्तुवन् श्लोक एषोऽनुरूपं किमपि वक्ति, तद्यथा-

**चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा।**
**गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः।।** इति।

अत्र शिष्याणां वृद्धत्वं नाम वयसा ज्येष्ठत्वम् अभिप्रेतम्, किन्तु तदपेक्षया ज्ञानेन धर्मेण च श्रेष्ठताम् आप्नुवतः यूनोऽपि गुरुत्वं सर्वथा स्तुत्यमिति आशयो भारतीयसंस्कृतौ ज्येष्ठताऽपेक्षया श्रेष्ठताया महत्तरत्वं सुतरां साधयति।

एतदासीत् प्रवृत्तघटनाश्रेण्याश्रितस्य अस्माकं स्वभावस्याख्यानम्। प्रवृत्त-प्रवर्तिष्यमाणयोरन्तराले प्रवर्तमानं जीवति। प्रवर्तमानानाम् अस्माकं मनसि प्रवर्तिष्यमाण-विषये विविधाः शङ्काः समुद्यन्ति। समग्रधरायां ज्येष्ठत्वस्य प्राबल्यं दृश्यते। धनेन बलेन चातुर्येण स्वस्य इतरापेक्षया ज्यायस्त्वं साधयितुं सर्वाणि राष्ट्राणि परस्परं स्पर्धन्ते। भोगेन ऐश्वर्येण चातुर्यकर्तृकपरद्रव्यापहरणादिना व्यसनेन ज्येष्ठत्वं साध्यमानं लक्ष्यते। तज्ज्येष्ठत्वजन्यः अहङ्कारोऽपि तेन परिमाणेन विवर्धमानो भवत्येव। किन्तु श्रेष्ठत्वे सिद्धे सर्वं किंचन कल्याणमयं भवति। यतो हि श्रेष्ठत्वं भोगेन व्यसनेन वा नैवाऽऽप्यते, अपि तु त्यागेन तपसा सर्वजनहितचिन्तनेनैव तत् सुलभं भवति।

उपर्युक्तेषु उदाहरणेषु यत् श्रेष्ठत्वम् अस्माभिः परिलक्षितं तत् सर्वं तत्तद्बालानां युवजनानां वा नित्यानित्यवस्तुविवेककारणेन, प्राणिमात्रकल्याणकामनया सात्त्विक्या वा बुद्ध्या सिद्धं विद्यते। सात्त्विकबुद्धिलक्षणं यथोक्तं गीतायाम्-

**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाऽभये।**
**बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी।।** (गीता १८.३०)

यदि वयं सात्त्विकबुद्ध्या कार्याकार्ये विविच्य अकार्यं विहाय कार्ये, बन्धनिमित्तं विहाय मोक्षसाधने प्रवर्तामहे तर्हि तेन नूनमेव अस्माभिः सह सर्वेषां कल्याणं सम्पत्स्यते, तेनैवोपायेन अस्माकं श्रेष्ठत्वं पूर्ववत् सिद्ध्येत्। न केवलं धनावाप्तिप्रसङ्गे विषयोपभोगविषये वा ज्येष्ठत्वश्रेष्ठतयोरयं भेदो विवेच्यः, अपि तु ज्ञानाहरणप्रसङ्गे तदुपयोगसन्दर्भे च एतद् ध्यातव्यं विद्यते। इदानीन्तनः कालखण्डः ज्ञानकालखण्डः इत्युच्यते। सर्वविधविषयेषु ज्ञानस्य आदानं प्रदानं व्यापारश्च सर्वत्र चलन्ति। सम्पूर्णे विश्वस्मिन् सम्बद्धविषयविशेषज्ञानां विशिष्ट आदरः, तेषां च सम्पूर्णे विश्वस्मिन् अन्तर्जाल (internet) द्वारा सम्पर्कः, तेषामुपयोगदृष्ट्या मूल्यनिर्धारणम्, तत्र च न्यूनाधिक्याधारेण तेषां कुत्रचित् अनुबन्धः इत्यादिकं पूर्वापेक्षया समधिकया शक्त्या प्रवर्तमानं विद्यते। अत्र यदि कस्यचिद् विशिष्टज्ञानविशेषज्ञस्य प्रवृत्तिनिवृत्तिभेदबुद्धिः नश्यति, कार्याकार्यविचारणा लुप्यते तर्हि तस्य समाजे धनसम्पत्त्यादिकारणेन ज्येष्ठत्वं तु आपद्येत किन्तु श्रेष्ठता सिद्धा न भवेत्। विद्याया अर्थकारित्वं यदि सीमाबद्धं न स्यात् तर्हि **सा विद्या या विमुक्तये** इति भागवतोक्तिः विफला भवति यतो हि सा विद्या बन्धनाय प्रवर्तयेत्। यदि तस्या विद्याया ज्ञानस्य वा उपयोगः सकलजनहिताय भवति तर्हि सा तदुपयोक्तुः न केवलं विमुक्तये परमसन्तोषाय वा भवति, अपितु तस्य श्रेष्ठत्वमपि सम्पादयति, विशिष्टतया यूनां मध्ये आभियान्त्रिक-चिकित्सा-प्रबन्धनादिविषयमाश्रित्य ज्ञानार्जनाय तथा च अर्जितज्ञानद्वारा प्रभूतधनार्जनस्य या स्पर्धा दृश्यमाना विद्यते तत्र अन्ततोगन्वा तेषां निष्फलं ज्येष्ठत्वं साधीयो भवतु नाम, किन्तु श्रेष्ठत्वं नैवाप्तुं शक्ष्यते। अतोऽत्र कथितरीत्या सात्त्विकबुद्ध्या एव ज्ञानार्जनं ज्ञानोपयोगश्च अतीव प्रासङ्गिकतया ध्यातव्ये स्तः।

शोधपत्रमिदम् **आरण्यकं** प्रत्येकं ज्ञानप्रसङ्गे सर्वेषां श्रेष्ठत्वं यथा सुतरां साध्यं स्यात् तदर्थं सूत्रधाररूपेण प्रवर्तमानं विद्यते। वृत्तवर्तिष्यमाणयोर्मध्ये वार्तमानिकीम्



इतिकर्तव्यतां निश्चेतुं शास्त्रप्रथितविषयाणाम् आलोडने नैरन्तर्यम् अपेक्षितं विद्यते। गीतायामुक्तमस्ति–

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।** (गीता १६.२४)

कार्याकार्यविवेकभूमौ प्रामाणिकतया शास्त्राणामेव विद्यमानतया तेषु अवगाहमानानां चिन्तनपुटकानि शब्दार्थशरीरमाश्रित्य यत् निःसरेयुः तानि सम्यक्तया आधातुं सकलसहृदयानां पुरतश्च तानि समुपस्थापयितुं शोधपत्रमिदं प्रयतमानमस्ति। प्रयत्नेऽस्मिन् कालगतो विलम्बो यत् सञ्जायते तदग्रे न स्यादिति यतमाना वयं विदुषां पुरतः आरण्यकस्य नवीनं कलेवरमिदं प्रस्तोतुं प्रभवाम इति।

## सितम्बर २००९

कालो गच्छति। महाकालः साक्षिभावमादाय पश्यति। श्रीभगवान् अर्जुनस्य अन्तर्गतं पाण्डित्यम् उद्बोध्योपदिशति-**गतासूनगतासूँश्च नानुशोचन्ति पण्डिताः** इति। अर्थात् ये गताः प्रस्थिता वा ते नानुशोच्याः तथा च अगतासवो विद्यमाना वा तेऽपि नानुचिन्तनीयाः, यतो हि यथाकालं सर्वैरपि प्राणिजातैः प्रस्थातव्यमेव। एष विचारस्तु परिणतबुद्धीनां पण्डितानां कृते इति उद्धृतांशाशयः। किन्तु ये सामान्याः जनाः तेषां कृते विद्यमानविषयिणी चिन्ता न करणीयेति वचनानुपालनं न तथा सुकरं भवति। तेषां विषये 'स्थितस्य गतिश्चिन्तनीये'ति शास्त्रव्यवहारवतां सामान्याभिमतम् अतीवोपयोगि स्यादेव।

पाणिनीयव्याकरणे 'दन्तानां राजा = दन्तराज' इति वैयाकरणविधिमनुसृत्य प्रयोक्तव्यतां परित्यज्य 'राजदन्तः' इति वास्तविकप्रयोगस्य प्रामाण्यं पुरस्कृत्य 'राजदन्तादिषु परम्' (पा.२.२.३१) इति सूत्रविशेषो व्यरचि महर्षिपाणिनिना। तत्रेदं कारणं यत् सत्स्वपि सिद्धान्तेषु तद्व्यतिरिक्तशिष्टप्रयोगस्य प्रामाण्यम् अवश्यं स्वीकार्यमिति। अतः सर्वथा नियमप्रणयापेक्षया प्रयोगप्रणयो विजयते। 'गतस्य स्थितिश्चिन्तनीया' इत्यपेक्षया 'स्थितस्य गतिश्चिन्तनीया' इति सिद्धान्त आद्रियते।

भारतीयदर्शनं गतस्य स्थितिमनुचिन्त्य बहुविधं चिन्तनं प्राचीनकालादेव विदधदस्ति। मृत्योः परम् आत्मनः केन रूपेण विद्यमानता उत मृत्युरेव अन्तिमा परिणतिरिति मतमाश्रित्य सम्पूर्णा उपनिषद्भारती विद्योतते। तृतीयवररूपेण नचिकेता अमुमेव प्रश्नं यमस्य पुरत उपस्थापयति-

**येयं प्रेते विचिकित्सा मनुष्येऽ-**
**स्तीत्येके नायमस्तीति चैके।**
**एतद्विद्यामनुशिष्टस्त्वयाहं**
**वराणामेष वरस्तृतीयः।।** (कठोप. १.१.२०)

मृत्योर्वास्तविकीं स्थितिं विज्ञाय तज्ज्ञानबलेन तं (मृत्युं) विजेतुं भारतीयमनीषाया अयं ज्ञानजैत्ररथः सुतराम् अग्रेसरः परिलक्ष्यत एव। अत एव भारतीयानाम्



आराध्यो देवाधिदेवो महादेवः 'मृत्युञ्जय' इति पदवीमाधत्ते। अतोऽत्र **अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत। अव्यक्तनिधनान्येव......** (गीता २.२८) इत्युक्त्या केवलं व्यक्तमध्यं शरीरमादाय तदन्वितं जीवनं न प्रवर्तते, अपितु अव्यक्तमपि तत्त्वं विजिज्ञासवश्चेतसा मनसा वपुषा च तत्सन्निहितचिन्तनधियो दृश्यन्ते, व्यक्ताव्यक्तरूपं पूर्णं सत्यमूहितुं प्रयतन्त इति भावः। तद्यथा-

**हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।**
**तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।** (ईशोप. १५)

एतेन गतस्य गमनशीलस्य वा जीवनस्य स्थितिं विज्ञाय **विद्ययाऽमृतमश्नुते** (ईशोप. ११) इति वचनात् अमृतत्वावाप्तिः मर्त्यानां परमं लक्ष्यमिति आर्यचिन्तनपरम्परायां मौलिकं विशिष्टं च स्वरूपं प्रभवतितराम्।

किन्तु, कथितैषा धीः केवलम् अविज्ञातमदृष्टमव्यक्तं वा विमर्ष्टुं प्रवर्तत इति न, एषा वर्तमानजीवनं कदापि नोपेक्षत एव। अत ईशावास्योपनिषद आदावेव परमं सर्वव्यापि तत्त्वमभिधाय त्यागसहितं जीवनं जीवितुमुपदिशन्ति मन्त्रद्रष्टारः, तद्यथा-

**ईशावास्यमिदं सर्वं यत् किंच जगत्यां जगत्।**
**तेन त्यक्तेनं भुञ्जीथा मा गृधः कस्य स्विद्धनम्।।** (ईशोप. १)

तथा च जीवने कर्मणः प्रामुख्यमुद्घोषयता मन्त्रेण तत्रैवोक्तम्-

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।** (ईशोप. २)

अत एव नचिकेताः यमेन प्रतिज्ञातेषु त्रिषु वरेषु प्रथमवररूपेण आत्मतत्त्वविज्ञानं न प्रार्थयते, अपितुं स्वस्य पितुः मानसिकीं शान्तिं मन्युराहित्यं च कामयत एव-

**शान्तसंकल्पः सुमना यथा स्याद्**
**वीतमन्युर्गौतमो माभि मृत्यो।** (कठोप. १.१.१०)

अखिलां गीतां तद्गतं तत्त्वचिन्तनं च श्रुत्वा अर्जुनः अन्ततो युयुत्सुरेव भवति, न तु मुमुक्षुः। शौनकादयः सहस्राणि ऋषयो लोकजीवने क्लेशाक्रान्तानां जीवानां कष्टनिवारणपूर्वकं सुखप्राप्तये उपायविषयमेव सूतं पप्रच्छुः, न तु आत्मनः सौख्यम् अथवा जीवानां केवलं परलोकगतकल्याणसिद्धिम्, तद्यथा-

**प्रायेणाल्पायुषः सभ्य कलावस्मिन् युगे जनाः।**
**मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः।।**

भूरीणि भूरिकर्माणि श्रोतव्यानि विभागशः।(भागवतपुराणम् १.१.१०)

एवमेव कर्मसन्यासिनोऽपि ऋषयः लोकानाम् उचितकर्मसु प्रवृत्तिमेव विमृशन्त आसन् न तु कर्मनिवृत्तये उत्प्रेरकाः। अतः स्वधिया गतस्य अदृष्टा स्थितिर्यद्यपि वेदितव्या तथापि तदपेक्षया आदौ 'स्थितस्य गतिश्चिन्तनीये'ति व्यावहारिकं सिद्धान्तमाश्रित्य लोका यथा प्रवर्तेरन् तथा मतिः सर्वेषु शास्त्रेषु दर्शनेषु काव्येतिहासादिषु च दृश्यत एव। एतेन कारणेन न केवलं प्रत्यक्षमेव प्रमाणमामनन्ति वैदिका दार्शनिकाः अपितु अनुमानेन पर्वतगतमग्निमूहन्ते, उपमानेन गवयज्ञानं साधयन्ति, आप्तवाक्येन च परोक्षसत्यम् अनुभूततत्त्वं वा पोषयन्त्यपि। अर्थात् यत्र कुत्रापि यस्य कस्यापि स्थितिः, तस्य गतिर्ज्ञानं वा अवश्यं प्राप्येत, न तु तस्य कृते उपेक्षाबुद्धिः प्रवर्ततेति भारतीया भावस्वरूपा शेमुषी संसिद्धैव। अतो ये केचन भारतीयचिन्तनं पलायनपरं परलोकादिविषयं वा वदन्ति तेऽनेन विवेकेन सुतरां प्रत्यूहितुं शक्यन्ते।

'आरण्यका'ख्यं शोधपत्रमिदं संस्कृतवाङ्मये तत्तच्छास्त्रादिस्थितेः गतिं ज्ञानं वा उक्तरीत्या समीक्षितुमीहते। अङ्केऽस्मिन् पण्डिततारानाथतर्कवाचस्पतिना विरचित-मद्यावधि विद्वद्भिः सम्यक्तया अनीक्षितं शब्दार्थरत्नाख्यमतीव मौलिकं पुस्तकं तद्गतरहस्यान्वाख्यानपूर्वकं तद्रचयितृवैदुषीप्रथनपुरस्सरं च समीक्षितं विद्यते, तथैव महाकविरत्नाकरविरचितं 'हरविजयमहाकाव्य'मपि तद्गतरसपरिपाकसमुल्लेखेन सह समीक्ष्यते। भक्तेरुद्गमस्थलं वेदेषूहितुमत्र लेखविशेषे प्रयत्यते। तथा च व्याकरणे क्तप्रत्ययस्य सैद्धान्तिकानि व्यावहारिकाणि चाखिलानि स्वरूपाणि विविच्यन्ते। श्रीचैतन्यदेवस्य गौड़ीयवैष्णवपरम्परायां नामसंकीर्तनस्य महत्त्वं यथा विविच्यते तथा तस्य सामाजिकः प्रभावोऽपि संदर्श्यते। अपि च अद्यतने काले उपनिषच्छिक्षायाः आवश्यकता लेखविशेषे उपस्थाप्यते, किं चाऽन्यत्र योगवासिष्ठगतो जीवन्मुक्तप्रसङ्गः विमृश्यतेऽपि। मम्मटोक्तमङ्गलश्लोके भारत्याः जयोक्तेः सारांशोऽपि लेखविशेषे पुरस्क्रियते, तथा च रामायणीयबालकाण्डापेक्षं संस्कृतनाटकगतं वस्तुकथनं केन प्रकारेण सपरिवर्त्तमुपन्यस्यते तदपि विविच्यत इति विविधा एते विमर्शाः स्वाकृतिं लब्धवन्तः सन्ति। समेषां लेखलेखकानां कृते कार्तज्ञ्यं विज्ञाप्यते किं च आरण्यकपाठकानां सहृदयता भूयः सदाशयता च भूयोभूय आकाङ्क्ष्यते।



## मार्च २०१०

अवस्थानम् अवस्था। देशकालाभ्याम् अवच्छिन्ना किं च अनवच्छिन्नेति अवस्थायाः भेदद्वयं कल्पयितुं शक्यते। देशविशेषस्य तद्गतस्थानस्य वा कस्यचित् स्थितिः 'तदवस्था' इति लोके व्यवह्रियते, तद्यथा–'जम्मू-कश्मीरप्रान्तस्य अवस्था नातिसुखावहा विद्यते' इत्यादि। एवं च कालगताऽवस्थापि प्रयुज्यते, तद्यथा–'प्राचीनकालगताऽवस्था समीचीनाऽऽसी'दित्यादि। देशकालान्यतरानवच्छिन्नाऽपि अवस्था विविधैः प्रमाणैः ऊह्यते। यथा–अद्वैतवेदान्तदर्शने 'ब्रह्म सत्यं जगन्मिथ्या' इति साधयितुं देशकालाद्यनवच्छिन्नस्य सतो ब्रह्मणः अवस्थाकल्पनं प्रभवति। यद्यपि ब्रह्मब्रह्माण्डयोः आधेयाऽऽधारभावः कल्पयितुमयोग्यः तथापि उपाधिभूतस्य कस्यचित् चेतनस्य अवस्थाकारणेन अचेतनमिदम् असद् जगद् उत्पद्यते, रज्जौ सर्पवत् प्रतीयमानं च भवतीति हेतोः चेतनस्य अवस्था अनस्वीकार्येति बोधः प्रवर्तते।

मानवजीवने कालावच्छिन्ना अवस्था चतुर्धेति सामान्यो विवेकः। ताश्चाऽवस्थाः सन्ति–शैशवम्, कौमारम्, यौवनम्, जरा चेति। ताश्च षड्भिर्भावविकारैः सिद्ध्यन्तीत्यपि वक्तुं शक्यते। ते च भावविकाराः निरुक्तकारेण यास्काचार्येणैवम् उक्ताः–जायते, अस्ति, विपरिणमते, वर्धतेऽपक्षीयते विनश्यतीति। तांश्च भावविकारान् व्याचक्षाणेन तत्तद्भावविकारजन्या एकैका अवस्था ऊह्यते, तद्यथा–'जायते इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति' (निरुक्तम्, १.१.२)। वस्तुतः भावविकाराणाम् एतत् पौर्वापर्यं देशकालकृतमेव गृह्यते, अन्यथा 'जायते' इत्यत्र जनिशब्दवाच्ये भावविकारे अस्तेरपि अर्थो विद्यते एव, यतो हि यः अविद्यमानः स कथं जायेत? यदा किञ्चिद् वस्तु विपरिणमते तदा तस्य अस्तित्वमपि अवश्यं स्वीकरणीयम्। तर्हि 'जायते' इत्यवस्थायाम् 'अस्ति' इत्यस्य सत्ता, 'अस्ती'त्यवस्थायां 'विपरिणमते' इत्यस्य स्थितिरिति एवं क्रमं पश्यामश्चेत् कथमेते जायते, अस्ति, विपरिणमते इत्यादयो भिन्ना भिन्ना भावविकारा गृह्येरन् इति विवेचनविषयम् ऊरीकृत्य दुर्गाचार्यः समाधत्ते यत् शब्दः एकार्थवृत्तिर्भवति। एकस्मिन् काले एकस्मिन् अर्थे वृत्तिः यस्य स तादृशः

शब्दः एकार्थवृत्तिः भवति। अतः यदा 'जायते' इति एष प्रयोगो विधीयते, तदा 'अस्ति' शब्दवाच्यः भावविकारः पूर्णतया विवक्षितो न भवति, अतः जायमानावस्थायां प्रयुज्यमानो 'जायते' इत्येष शब्दः वर्तमानमपि 'अस्तित्वं' नाभिधत्ते, तद्यथाऽऽह दुर्गाचार्यः-'न ह्यजातोऽस्तीत्युच्यते। नाप्यविद्यमानो विपरिणमत इति। तत्रैवं सति जायत इत्येष शब्दो जन्मैव केवलं ब्रवीत्यविवक्षितेतरभावविशेषम्। किं कारणम्? एकार्थवृत्तित्वाच्छब्दस्य। अस्तिशब्दवाच्यस्य भावविकारस्यासम्पूर्णत्वात्। अनवधृतरूपं हि तस्यामवस्थायां तद् भवत्यनुमानगम्यं किमपि जायत इति। तस्माज्जायत इत्येष शब्दो जायमानावस्थायामस्तित्वं विद्यमानमपि नाचष्टे।' (दुर्गा., निरुक्तम्, १.१.२)। अर्थात् भावविकारविशेषं द्योतयन्ती प्रत्येकं शैशव-कुमाराद्यवस्था आत्यन्तिकीं स्थितिम् अनभिधाय काञ्चित् सापेक्षिकीं दशामेव बोधयति, शैशवादिशब्दस्य एकस्मिन् काले एकार्थवृत्तित्वात्। अतः शैशवे कौमारावस्थायां विद्यमानायां सत्यामपि 'शैशव' शब्दः कौमारं भावं नाचष्टे।

वेदान्तदर्शने जाग्रत्-स्वप्न-सुषुप्ति इति चेतनायाः अवस्थात्रयं वर्ण्यते। तत्रापि क्रमशः जाग्रदवस्थाऽपि 'जायते' इति वत् पूर्वभावस्यादिमाचष्टे, नापरभावम् अर्थात् न स्वप्नभावम् आचष्टे, न च प्रतिषेधति इति नैरुक्तसमयम् इव व्याख्यानं विधाय अवस्थाभेदानां सापेक्षं वैशिष्ट्यम् ऊरीकर्तुं शक्यते।

नाट्यं परिभाषमाण आचार्यधनञ्जय आह 'अवस्थानुकृतिर्नाट्यम्' (दशरू पकम्, १.७) इति, कीदृश्याः अवस्थायाः अनुकार इति जिज्ञासायां 'काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम्' इति आचार्यो धनिकः अवलोके व्याख्याति। अर्थात् अभिनयद्वारा कस्यचित् रामसीताद्यन्यतमस्य तात्कालिकस्थितेरिव स्थितेरुपन्यास एव नाट्यम्। कीदृश्येषा अवस्था या अनुकर्तुं शक्यते? तच्चाऽनुकरणं दृष्टस्य ज्ञातपूर्वस्य वा चरित्रविशेषस्य अवस्थाया इति न, किन्तु पूर्णतया काल्पनिकस्य कस्यचित् चरितस्यापि भवतीत्यतः सा अवस्था बौद्धिकी, न तु शारीरिकीति ऊहनीयमेव। अतिपरिचितां परिणीतां प्रेयसीमपि शकुन्तलाम् अपरिचिन्वतोऽत्यन्तमशिष्टस्य दुष्यन्तस्य वचनानि श्रुत्वा शकुन्तलायाः कीदृशी अवस्था उदपद्यत, तामवस्थां पुरस्कृत्य कीदृशी वाणी तस्याः मुखात् निरगच्छत्, इत्यादिघटनाः कवेः साक्षात् पुरतः घटमानाः अदृष्टा अपि तत्तद्घटनागतानाम् अवस्थाविषये



परिकल्पनपरायणः कविः तत्तत्परिकल्पितावस्थाः यथा अनुकर्ता नटादिः अनुकुर्यात् तथा साहित्यम् उपन्यस्यति। अत्र अवस्थाविषयिणी कल्पना द्विधा परिलक्ष्यते। प्रथमा तावत् तत्तन्मुहूर्तगतासु घटनासु दुष्यन्तशकुन्तलादेः कीदृशी मानसिकी अवस्था कीदृशाश्च नेत्रवक्त्रादिविकाराः स्युरिति काल्पनिकघटनागतपात्राणां व्यवहारकल्पना। द्वितीया तावत् तां ताम् अवस्थां प्राप्नुवताम् अनुकार्याणां दुष्यन्तादीनां व्यवहारान् आङ्गिकान् वाचिकाँश्च विकारान् तत्तत्काव्यानुसन्धानबलात् किं च अभिनयकौशलशिक्षया भूयो भूयस्तदभ्यासेन च यथा नटः आत्मनि सम्यक् निर्वर्तयेत् तथा कल्पना। तद्यथा आचार्यश्रीशङ्कुकस्य रससूत्रविषयकं मतं विवृत्य काव्यप्रकाशकार आह-

"काव्यानुसन्धानबलाच्छिक्षाभ्यासनिर्वर्तितस्वकार्यप्रकटनेन नटेनैव प्रकाशितैः कारणकार्यसहकारिभिः कृत्रिमैरेव तथाऽनभिमन्यमानैर्विभावादिशब्दव्यपदेश्यैः....." (का.प्र.चतुर्थ उल्लासः)

अत्रेदं वैशिष्ट्यं नाम नटगतं दुष्यन्तत्वं तथा च नटगतभुजाक्षेपादिविकाराः, रोमाञ्चवेपथ्वादयो भावाः कृत्रिमाः, किन्तु साधारणैः सहृदयैः एते नटगता अवस्थाविशेषाः कृत्रिमाः इति नाभिमन्यन्ते। अतः एका अवस्था तु वास्तविकदुष्यन्तादेः या मूलभूता कविना आत्मस्थभावेन कल्पिता, किं च अपराऽवस्थेयं नटगता या अवास्तविकी कृत्रिमा वा सत्यपि तथा सामाजिकैः न मन्यमानाऽस्ति। कविर्यथा प्रथमां दुष्यन्तादिगताम् अवस्थां कल्पते तथैव नटादिगतां कृत्रिमां किं च तथा अनभिमन्यमानामपि कल्पते इति कवेः कल्पनायाः कोटिद्वयं प्रवर्तत एव।

एवं च नाट्ये नायकादिभिः प्रारब्धस्य कार्यस्य पञ्च अवस्थाः भवन्ति, ताश्च-१. आरम्भः, २. प्रयत्नः, ३. प्राप्त्याशा, ४. नियताप्तिः, ५. फलागमः इति। अत्रापि पूर्वपूर्वापेक्षया उत्तरोत्तरा अवस्था सापेक्षधर्मवर्त्तिनी भवतीत्यूहितुं शक्यते।

नियतिकृतेषु नियमेषु सर्वस्याः अवस्थायाः परिवर्तनं भवत्येव। सुखदुःखयोरन्यतरं कियन्मात्रं दीर्घकालिकं भवतु नाम, तत् तदितरागमनेन परिवर्तते। तद्वत् शैशवाद्यवस्थाः अवस्थान्तरकारणेन अनित्या एव। यद्यपि प्रत्येकं शैशवाद्यवस्था तत्तद्गतविशिष्टगुण-दोषयुक्ता भवति तथापि सा अवस्थान्तरं प्राप्नोतीति कारणेन तद्गताः गुणाः जनैः स्मर्यन्ते, दोषाश्च क्षम्यन्ते।

किन्तु, लक्षणग्रन्थेषु लक्षणानाम् स्थायिनी नित्या वाऽवस्था एवाऽपेक्षिता भवति, अतः तत्र अनवस्था (न अवस्था अर्थात् अवस्थाऽभावः) दोषाय कल्प्यते, न तु स्वभावाय अथवा गुणाय। तद्यथा काव्यप्रकाशे लक्षणामूलव्यञ्जनाव्यापारस्वीकार-प्रसङ्गे 'गङ्गायां घोषः' इत्यादिप्रयोगे शैत्यपावनत्वाद्यातिशय्यरूपं प्रयोजनमेव व्यङ्ग्यमिति निश्चीयते। तत्र तत् प्रयोजनं कथं न लक्ष्यं भवति, लक्षणावृत्त्या वा कथं तन्नावगम्यते इत्यत्र अनवस्थादोषं दर्शयन् आचार्यो मम्मटो वक्ति-

'एवमप्यनवस्था स्याद् या मूलक्षयकारिणी। एवं प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण, तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् अनवस्था भवेत्।' (काव्यप्रकाशः, द्वितीय उल्लासः)

एवमेव नियतिकृतासु अवस्थासु अनवस्था अवस्थान्तरं वा गुणाय कल्प्यतां नाम, किन्तु अस्माकं जीवनं सुव्यवस्थितम् अनुशासितं वा यथा स्यादिति काङ्क्षमाणा वयं जीवनशास्त्रे काव्यशास्त्रादाविव अवस्थामेव वाञ्छामः, किं च अवस्थाऽभावम् अनवस्थां वा दोषरूपेण विवेचयाम एव।

समेषामस्माकं जीवनम् अनवस्थादोषरहितं यथा स्यात्तदर्थं विचारान् प्रकटयितुम् आरण्यकम् इदं यथा प्रवर्त्तेत, तथा तत्र लेखकपाठकादयः प्रमाणानि स्युरिति निवेदयति।